चतुर्थोऽध्यायः

४.१ पुनः प्रसङ्गविज्ञानात्सिद्धम्

तातङ बाधितः धिर्नस्यात् इति अवतरणग्रन्थस्याशयः

व्याकरणशास्त्रे **"विप्रतिषेधे परं कार्यम्[1]"** इति सूत्रेण पूर्वसूत्रापेक्षया परसूत्रस्य प्राबल्यं बोध्यते। उदा- रामेभ्यः। राम +भ्यस् इत्यवस्थायां **"सुपि च[2]"** इति सूत्रेण दीर्घः प्राप्तः, **"बहुवचने झल्येत्[3]"** इति सूत्रेण एकारादेशश्च प्राप्तः। अत्र परत्वात् एकारादेश एव प्रवर्तते। एवं सति 'भिदिर् विदारणे' इति धातोः लोटि मध्यमपुरुषैकवचने 'सि' प्रत्यये आदेशे 'श्नम्' विकरणे च भिनद् + हि अत् दशायं **"तुह्योस्तातङाशिष्यन्यतरस्याम्[4]"** इति सूत्रेण 'धि' आदेशाश्च प्राप्ताः। प्रागुक्तरीत्या परत्वात् 'तातङ्' आदेशे कृते 'भिन्तात्' इत्येकमेव रूपं स्यात्। तथा च 'धि' आदेशाभावे 'भिन्धि' रूपं न सिद्ध्येदिति आक्षेपे जाते तद्वारणार्थं परिभाषेयमारब्धा **पुनः प्रसङ्गविज्ञानात्सिद्धम्[5]** इति।

अयमाशयः

"वा विभाषादिपदानामभावसामानाधिकरण्यमर्थः। तथा च तुह्योस्ताङित्यादीनामशिषि तुह्योरभावसमानाधिकरणस्तातङ् भवतीत्यादिरूपेणणार्थः। एवञ्च तेषु भावाभावयोरुभयोरपि शब्दतो विधेयत्वलाभेन परत्वाद्धिभावं बाधित्वा तुह्योरित्यनेन ताताङ् तदभावयोः प्रवृत्तावभावे बाधितो धिभावस्तातङभावपक्षे पुनर्नस्यात्" इति।

अत्र समीक्षा

तत्तत्सूत्रेषु, वार्त्तिकेषु वा यत्र वा विभाषा इत्यादीनि पदानि श्रूयन्ते, तानि सर्वत्र पठितृणां प्रायः अयमभिप्रायो भवति। इदं कार्यं वैकल्पिकमिति। शास्त्रदृष्ट्या

---

1 अष्टा. १-४-२

2 अष्टा. ७-३-१०२

3 अष्टा. ७-३-१०३

4 अष्टा, ७-१-३४

5 परिभाषेन्दुशेखरः, परि.सं-३९,पृ-२१३

आलोच्य तु 'वा' 'विभाषा' इत्यादि पदानामभावसामानाधिकरण्यर्थः इत्येवं सोदहरणं सुष्टु निरूपितं व्याख्यानेषु

४.२. सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव

व्यक्ति-जातिपक्षयोः स्वरूपप्रदर्शनम्

'भिन्धि' इत्यादीनां लक्ष्याणां सिद्ध्यर्थं **पुनः प्रसङ्गविज्ञानात्सिद्धम्**[1] इति परिभाषा समारब्धा। किन्तु तदङ्गीकारे 'तिसृणाम्' इत्यत्र दोषः। त्रि+ आम् इति दशायां **"त्रेस्त्रयः**[2]" इति सूत्रेण त्रयादेशे **"त्रिचतुरोः स्त्रियां तिसृचतसृ**[3]" इति सूत्रेण 'तिसृ' आदेश च प्राप्ते, त्रयोदेशं बाधित्वा परत्वात् तिस्त्रादेशे, तदुत्तरं **पुनः प्रसङ्गविज्ञानत्सिद्धम्** इति परिभाषानुसारं त्रयादेशोऽपि स्यादित्याक्षेपे तद्वारणाय परिभाषेयमारब्धा- **सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव**[4] इति। अन्यत्र लब्धावकाशयोः द्वयोः शास्त्रयोः एकत्र प्रयोगे युगपदसंभावितस्वकार्यसमर्पणरूपप्राप्तौ सत्यां सकृत् = एकवारं यद्बाधितं तद्बाधितमेव = न पुनः प्रवर्तते इति परिभाषार्थः। अथ वा गतौ = प्राप्तौ इत्यर्थः। एकस्मिन् लक्ष्ये द्वयोः शास्त्रयोः युगपत् तद्बोध्ययोः कार्ययोः युगपदसंभवरूपे विरोधे सति सकृत् = एकवारं यद्बाधितं तद्बाधितमेव, न पुनः प्रवर्तते इति परिभाषार्थः।

४.२.१ जातिव्यक्तिपक्षयोः स्वरूपनिरूपणम्

व्यक्तिपक्षे **"विप्रतिषेधे परं कार्यम्**[5]" इति सूत्रस्य नियमार्थत्वामाश्रित्य **सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव** इति न्यायः, जाति पक्षे **"विप्रतिषेधे परं कार्यम्**[6]" इति सूत्रस्य विध्यर्थत्वसमाश्रयणे **पुनः प्रसङ्विज्ञानत्सिद्धम्** इति परिभाषा सिद्ध्यतीति कौयटोपाध्यायः मनुते। नागेशोपाध्यायस्तु तन्नाङ्गीकुरुते। तद्यथा व्यक्तिपदार्थतायामेकस्य व्यक्तेर्ब्राह्मणशब्देन बोधनान्निषेधस्य सकलब्राह्मणविषयकत्वं स्यात्। । जातिपदार्थतायां तु ब्राह्मणशब्दस्य ब्राह्मणत्वरूपजातिबोधकतया तस्या

---

1 परिभाषेन्दुशेखरः, परि.सं-३९,पृ -२१३

2 अष्टा. ६-३-४८

3 अष्टा. ७-२-९९

4 परिभाषेन्दुशेखरः, परि.सं -४०,पृ -२१५

5 अष्टा. १-४-२

6 अष्टा. १-४-२

निश्चित्वेन तत्र हननक्रियाकर्मताया असंभवान्निषेधस्य व्यर्थतया तज्जात्याक्रान्तव्यक्तिनिषेधस्संकामन् विनिगमनाविराहत्तदाक्रान्तसकलव्यक्तिषु संक्रामतीति सकलब्रह्मणविषयकत्वलाभः इति।

अत्र समीक्षा

न्याय-व्याकरण-मीमांसादिशास्त्रेषु तत्तत्प्रसङ्गे जातिपक्षः व्यक्तिपक्षश्च भृशमभिव तत्र केचन जातिपक्षमेव समाद्रियन्ते,न तु व्यक्तिपक्षम्। इतरे व्यक्तिपक्षमेव समाश्रयन्ति जातिपक्षम्। वैयाकरणस्तु तत्तल्लक्ष्यानुसारं द्वावपि पक्षौ समाद्रियन्ते। प्रसङ्गेऽस्मिन् अनयोः द्वयोः पक्षयोः स्वरूपं सम्यक् निरदिशन्।

४.२.२. शास्त्रीयलौकिकदृष्टान्तयोः व्यवस्थाप्रदर्शनम्

व्यक्तिपक्षाश्रयणैन सकृन्नतिम्यायः, जातिपक्षस्य आश्रयणेन **पुनः प्रसङ्गन्यायश्च आश्रीयते** इति कैयटोपाध्यायः मनुते। नागेशोपाध्यायस्तु न तदनुमन्यते। महाभाष्ये तृजादिदृष्टान्तेन सकृद्गतिन्यायस्य, प्रेष्यन्यायेन पुनःप्रसङ्गन्यायस्य च सिद्धेः प्रतिपादनात्। न हि भाष्योक्ततृजादिदृष्टान्तस्य व्यक्तिपक्षे एव सर्वविषयकत्वं, न जातिपक्षे इत्यत्र मानमस्तीति नागेशोपाध्यायः प्रत्यपादयन्।

अत्र गूढार्थदीपिकाकाराः[1]

प्रागुक्तिं नागेशपङ्क्तिं व्याचक्षणाः नागेशगूढार्थदीपिकाकाराः अयं भावः इत्यादिना इयं विशद्यकुर्वन्। यथा – **"विप्रतिषेधे परं कार्यम्**[2]" इति सूत्रस्थं भाष्यं एतदृशसाधरण्येन दृष्टान्तभेदेन प्राप्तयोः पर्यायप्रतिरत्योराश्रयणेन।तद्वचनस्य नियामकत्वविधायकत्वव्युत्पादनपरम्। न तु जातिव्यक्त्याश्रयणेन। अन्यथा कैयटोक्तदिशा व्यक्तिपक्षे तृजादिदृष्टान्तेन पर्यायताया जातिपक्षे प्रेष्यदृष्टान्तेनाप्रतिपत्तेश्च वक्तव्यतया जातिपक्षवृत्तामप्रतिपत्तिमुपक्रम्य तव्यादिष्वप्रतिपत्तिरूपदोषशङ्कापरं तव्यदादीनां त्वप्रसिद्धः। हि तव्यदादिषु नियमकारि शास्त्रमारभ्यते। येन तव्यदादयस्स्युः। यश्च भवता हेतुर्व्यपदिष्टः

---

1 प.शे(नागेशगूढार्थदीपिकासहितः)

2 अष्टा. १-४-२

जातिपत्तिर्वा उभयोस्तुल्यबलत्वात् इति, तुल्यस्य तव्यदादिषु इति भाष्यम्[1] असङ्गतं स्यात्। तेषामपि धातुमात्राद्विधानेन तृजादितुल्यतया तृजादिष्विवैतद्विषयेऽपि व्यक्तिपदार्थत्वाश्रयणेन व्यख्यायतया एवौचित्यात्। किञ्चैकसूत्रोपत्तत्त्वादनवकाशत्वच्च नास्त्येषां परत्वेन व्यवस्थेति कैयटासङ्गतिश्च। जातिपक्षे धातुत्वाक्रान्ते क्वचिल्लक्ष्ये तेषां चारितार्थ्येनानवकाशत्वाभावात्। व्यक्ति दिशा तत्पक्षे शास्त्रस्य सकललक्ष्यव्याप्तेरभावात्। अतः पक्षद्वयेऽपि शास्त्रस्य सकललक्ष्यव्याप्तेरेकशेषसूत्रे भगवतासिद्धान्ततया स्पष्टमुक्तत्वेन पक्षद्वयेऽपि शास्त्रीयदृष्टान्ताश्रयणे स्वरूपत्त्या विप्रतिषेधसूत्रस्य नियामकत्वं, लोकदृष्टान्ताश्रयणेत्वप्रतिपत्त्या विधायकत्वमित्येव भाष्यम्। अत एव तच्छेषभाष्ये विप्रतिषेधे परमितीयता सूत्रेण वार्त्तिककृदुक्तयोस्सकृद्गतिन्यायपुनःप्रसङ्गविज्ञानन्याययोः कथं सिद्धिरित्याशङ्क्य पक्षविशेषास्मरणेन यदा तावदेष दृष्टान्तस्तृजादिभिस्तुल्यं पर्यायः प्राप्नोतीति तदा विप्रतिषेधसूत्रस्य नियामकत्वात् सकृद्गतिन्यायोपपत्तिः। यदा त्वेष हेतुरप्रतिपत्तिर्वा, उभयोस्तुल्यबलत्वादिति तदा विप्रतिषेधेपरमित्यस्य विधायकत्वात्। पुनः प्रसङ्गविज्ञानन्यायसिद्धिरिति तदुत्तरभाष्यं सङ्गच्छते। अतः कैयटरीत्या योजनं न युक्तम् इति।

अत्र समीक्षा

व्यक्तिपक्षस्याश्रयणेन सकृद्गतिन्यायः, जातिपक्षस्याश्रयणेन पुनः प्रसङ्गन्यायश्च सिद्ध्यतीति कैयटादीनामाशयः। वस्तुतस्तु "**विप्रतिषेधे परं कार्यम्**[2]" इति सूत्रभाष्यस्य पर्यालोचने पक्षद्वययसाधारणता तत्र प्रतीयते। अतः कैयटोक्तं न साधु। तथा च "**ण्वल्तृचौ**[3]" इति शास्त्रीयदृष्टान्तस्याश्रयणे सकृद्गतिन्यायः, प्रेष्यदृष्टान्तस्याश्रयणे सकृद्गतिन्यायः,प्रेष्यदृष्टान्तस्याश्रयणे पुनःप्रसङ्गन्ययश्च सिध्यतीति फलितोऽर्थः।

---

1 व्या.म.भा(द्वि.भा) पृ -२०५,२०६

2 अष्टा. १-४-२

3 अष्टा. ३-१-१३३

४.३ विकरणभ्यो नियमो बलीयन्

'एध' वृद्धौ इति धातोः लटि 'एध्' इत्यवस्थायाम् **"अनुदात्तङित आत्मनेपदम्[1]"** इत्यात्मनेपदप्रत्ययः, **"कर्तरि शप्[2]"** इति सूत्रेण 'शप्' विकारणश्च प्राप्तः। तत्र परत्वात् विकारणप्रत्यये कृते तेन व्यवधानेन धातोः परत्वाभावात् तङादेशानुपपत्तिः इति शङ्कायां तन्निवृत्तये **विकरणेभ्यो नियमो बलीयान्[3]** इति परिभाषा आरब्धा। विकरणप्रत्ययानामपेक्षया **"अनुदात्तङित आत्मनेपदम्"[4]** इत्यादिभिः सूत्रैः उक्ताः आत्मनेपदादिनियमाः प्रबलाः भवन्तीति परिभाषार्थः। तथा च एधते इत्यादौ अनया परिभाषया आदौ आत्मनेपदे ततः विकरणे च अभीष्टं रूपं सिद्ध्यति। **"वृभ्द्यः स्यसनोः[5]"** इति सूत्रेण स्य विकरणे कृते विकल्पेन परस्मैपदविधानमस्याः परिभाषायाः ज्ञापकम्। अस्मिन् सूत्रे स्ये इत्यत्र विषयसप्तमी आश्रयणीयेति भाष्यकैयटयोः स्पष्टं वर्तते।

स्ये इत्यस्य विषयसप्तमीस्वीकारेण **"तस्मिन्निति निर्दिष्टे पूर्वस्य[6]"** इति परिभाषायाः बाधकल्पनायां गौरवेण पक्षान्तरं समाश्रितम्। यथा विकरणव्यवधानेऽपि आत्मनेपदादि नियमः प्रवर्तते इत्यत्र स्ये विकल्पेन परस्मैपदविधानं ज्ञापकं भवतीति **"शदेः शितः"[7]** इत्यत्र भाष्ये ध्वनितमिति नागेशोपाध्यायः निरूपयामास।

अत्र ध्वनप्रकारः

तत्र हि उपसर्गपूर्वनियमेऽङ्व्यवाय उपसंख्यानं वक्तव्यम्। न्यविशत, व्यक्रीणीत। किं पुनः कारणं न सिद्ध्यति? अटा व्यवहितत्वात् इत्युक्तम्। विकारणेभ्यो नियमस्य बलीयस्त्वे तु विकरणात्पूर्वं नियमे ततो नित्यत्वात् प्राग्विकरणे ततोऽडागमे च न्याविशतेत्यादिसिद्ध्या उपसंख्यानमनर्थकमेव स्यादिति तेनेदं ध्वनितम्।

---

1 अष्टा. १-३-१२

2 अष्टा. ३-१-६८

3 परिभाषेन्दुशेखरः,परि.सं- ४१,पृ -२२४

4 अष्टा. १-३-१२

5 अष्टा. १-३-९२

6 अष्टा. १-१-६६

7 अष्टा. १-३-६०

विकरणव्यवधानेऽपि नियमप्रवत्तिरित्यर्थज्ञापने तु परत्वनित्यत्वाभ्यां नियमादडागमाच्च पूर्वै विकरणे ततो नियमत्प्राङ्निनत्यत्वादडागमे च कृते उक्तज्ञापकेन विकरणस्याव्यवधायकत्वेऽप्यटो व्यवधायकत्वात्तेन "**व्यवधाने नेर्विशः**[1]"इति नियमाप्राप्त्या उपसंख्यानं वारितार्थमिति बोध्यम् इति।

अत्र समीक्षा

धातोः परत्वेन लडादिषु लकारेषु कृतेषु तिबादयः आदेशाः, शबादयः विकरणाश्च प्राप्ताः। तत्र वस्तुतः परत्वात् विकरणे कृते सति तेन व्यवधानात् आत्मनेपद-परस्मैपदरूपनियमः प्रवर्तेत इति शङ्कायाः परिहारार्थं परिभाषेयं समारब्धेति प्राङ्निनवेदितमेव। अस्याः परिभाषायाः द्वेधा ज्ञापकत्वं निरूपयितुं शक्यते इत्यपि विशदीकृतमेव।

४.३.१ भुक्तवन्तं प्रति मा भुक्थाः इत्यादिन्यायस्यात्र शास्त्रे आश्रीयते न वेति विचारः

अस्मिन् व्याकरणशास्त्रे **भुक्तवन्तं प्रति मा भुक्थाः किं तेन कृतं स्यात्** इति न्यायः नाश्रीयते इत्यंशः भाष्ये ध्वनितः इति प्रकृतपरिभाषाव्याख्यावसरे श्रीमता नागेशोपाध्यायेन निरूपितः।

अयमर्थः

"**स्थानेऽन्तरतमः**"[2]इति सूत्रस्य भिन्नवाक्यतया शास्त्रान्तरसिद्धादेशनिवर्तकत्वे भुक्तवन्तमिति न्यायविरोधेन जातनिवृत्ययोगाच्छास्त्रवैयर्थमापाद्य **उक्तं वा, किमुक्तं सिद्धं** तु **षष्ठ्यधिकारे पाठादिति "इको गुणवृद्धी**[3]" इति सूत्रोपदर्शितैकवाक्यतापक्षेण समाहितम्। तत्र वाशब्देनायमर्थस्सूचितः। अन्यथा पक्षान्तरानुक्तेस्तदसङ्गतिस्स्पष्टैव – इति।

अत्र समीक्षा

स्थानेऽन्तरतमः[4] इति सूत्रे भाष्यप्रदीपोद्योते[1] (उद्योतग्रन्थे) भुक्तवन्तं प्रति इति न्यायस्य एवं विवरणं दत्तं – लोके भुक्तवतः भोजनफलतृप्तेः जातत्वेन मा भुक्थाः इति

---

1 अष्टा. १-३-१७

2 अष्टा. १-१-५०

3 अष्टा. १-१-३

4 अष्टा. १-१-५०

निषेधस्य वैयर्थ्यं स्पष्टमेव। शास्त्रे तु वर्णेनाप्यनर्थकेन न भवितव्यमिति वृद्धिसंज्ञासूत्रस्थभाष्येण[2] शास्त्रानर्थक्यं निराकृतम्। अतः अस्मिन् शास्त्रे नियमादिशास्त्राणाम् अनर्थकतायाः वक्तुमशक्यत्वेन तत्सामर्थ्यात् जातस्यापि निवृत्तिरङ्गीकर्तव्या, शास्त्रवैयर्थ्यं तु न कदापि प्रतिपादनीयम् इति स्पष्टमेव

४.३.२ अत्र कश्चन मतभेदविचारः

यदीयं परिभाषा न स्यात् तदा वर्त्स्यतीत्यादौ वृत्+ल् इत्यवस्थायां परत्वात् "**स्यातसी लृलुटोः**[3]" इति 'स्य' विकरणे कते वृत्+स्य इति जाते, विकरणेन व्यवधानात् "**अनुदात्तङित आत्मनेपदम्**[4]" इति आत्मनेपदाप्राप्त्या सामान्येन तिबादिसूत्रेणैवोभयपदसिद्धौ "**वृभ्द्यः स्यसनोः**[5]" इति विकल्पेन परस्मैपदविधानं व्यर्थं सत् ज्ञापयति **विकरणेभ्यो नियमो बलीयान्**[6] इति। ज्ञापितायां तु अस्यां परिभाषायां वृत् धातोः अनुदात्तेत्वेन "**अनुदात्तङित आत्मनेपदम्**[7]" इति आम्त्मनेपदरूप एव नियमः स्यात्, न तु परस्मैपदम्। अत्र परस्मैपदमपि इष्टम्। अतः इष्टस्यास्य सिद्ध्यर्थं विधीयमानं परस्मैपदविधानं स्वांशे चारितार्थम्।

अत्र प्रश्नः

ज्ञापितायामस्याम् "**अनुदत्तङित आत्मनेपदम्**[8]" इति नियमप्रवृत्तिकाले स्य प्रत्ययपरत्वासम्भवेन विकल्पाप्राप्तेः निष्प्रतिपक्षतया प्रवृत्तौ विकल्पविधानस्य व्यर्थतया स्वांशे चारितार्थ्यं न भवतीति।

---

1 व्या.म.भा(प्र.भा), पृ -४२०

2 व्या.म.भा(प्र.भा), पृ -१६०

3 अष्टा. ३-१-३३

4 अष्टा. १-३-१२

5 अष्टा. १-३-९२

6 परिभाषेन्दुशेखरः,परि.सं -४१,पृ -२२४

7 अष्टा. १-३-१२

8 अष्टा. १-३-१२

अत्र समाधिः

यावता विना यदनुपपत्तिः तावत्सर्वं ज्ञाप्यते इति न्यायादनेन स्ये इत्यस्य विषयसप्तमीत्वमपि ज्ञाप्यते। ततश्च नियमप्रवृत्तिकाले स्यप्रत्यविषयतायाः सत्वात् नियमबाधकेन विकल्पविधानस्य चारितार्थ्यं भवति।

"अनुदात्तङित् आत्मनेपदम्[1]" इति सूत्रे भाष्ये कैयटे[2] चेदं स्पष्टं प्रतिपादितम्। अत्रापि पक्षे स्ये इत्यस्य विश्वदानेस्वीकारेण **"तस्मिन्निति निर्दिष्टे पूर्वस्य[3]"** इति सूत्रस्य बाधक्तवनार्ये गौरवम्। अतः लाघवसहकृतं पक्षान्तरं प्रदर्शितं विकरणव्यवधानस्य सत्त्वेऽपि **"अनुदात्तङित् आत्मनेपदम्[4]"** इत्यादिनियमस्य प्रवृत्तौ **"वृद्भ्योः स्यसनोः[5]"**इति सूत्रे ज्ञापकं भवतीति अस्य पक्षस्याशयः।अयञ्च पक्षः **"शदेश्शितः[6]"** इत्यत्र भाष्ये ध्वनितः[7]।

अयमपि पक्षः न समीचीनः। तथा-हि नियमाकत्वपक्षे धातोःपरस्य लस्य स्थाने तिबादिसूत्रेण अष्टादशानामपि प्रत्ययानां प्रवृत्तेर्वाच्यतया एकस्याः प्रकृतेरनेकेषां प्रत्ययानां परत्वेन प्रवृत्तेरसम्भवात् तावत् प्रकृतिकल्पनया तेषां प्रवृत्तिर्वाच्या। ततो अनुदात्तङित इत्यादिनियमेन केषांञ्चित् प्रत्ययानां निवृत्तौ तदनुरोधेन कल्पितानां प्रकृतीनामपि निवृत्तिर्वक्तव्यत्येवं जातनिवृत्तिकल्पनेऽतिमहद्गोरवमित्याशयेन श्रीमता नागेशोपाध्यनेन सिद्धान्तभूतः एकवाक्यतापक्षः प्रदर्शितः। **"अनुदात्तङित् आत्मनेपदम्[8]"** इत्यादीनां परिभाषात्वाङ्गीकाराद्यदा कार्यकालपक्षे कार्यकाङ्क्षावशात्कार्यदेशे उपस्थितानां परिभाषाणां विधिशास्त्रैकवाक्यतया विध्युपकारकत्वमेव स्वाकाङ्क्षावशात् **"तिप्थस्झिमिप्यसिप्यस्थमिप्वस्मस्ताताझाथासाथांध्वमिड्वहिमहिङ्[9]"** इति सूत्रे

---

1 अष्टा. १-३-१२

2व्या.म.भा(द्वि.भा), पृ -१४८,१५६

3 अष्टा. १-१-६६

4 अष्टा. १-३-१२

5 अष्टा. १-३-९२

6 अष्टा. १-३-६०

7 व्या.म.भा(द्वि.भा), पृ -१६७,१७२

8 अष्टा. १-३-१२

9 अष्टा. ३-४-७८

उपस्थितमनुदात्तङित् आत्मनपदमीत्यादि प्रकरणं तेन सह वाक्यैकवाक्यतापन्नं सदात्मनेपदपरस्मैपदविधायकमिति भावः। अस्मिन् पक्षे धातोः इति विहितपञ्चमीति तत्समानाधिकरणं **"अनुदात्तङित आत्मनेपदम[1]"** इत्यादि विहितविशेषणमेव। एवञ्च लावस्यायां स्य विकरणे कृतेऽपि विहितविशेषणस्य आश्रयणेन तद्व्यधानेऽपि आत्मनेपदं सिद्ध्यति। अनया रीत्या अस्याः परिभाषायाः विषये पक्षत्रयं प्रदर्शि। तत्र तृतीयः पक्ष एव सिद्धान्तभूतः।

एवं स्थिते यद्वा इत्यारभ्य अन्योऽपि पक्षः मूले सँलक्ष्यते। तथा हि यद्वा लमात्रापेक्षत्वादन्तरङ्ग आदेशः लकारविशेषापेक्षत्वात्। स्यादयो बहिरङ्ग इति दिग्योगलक्षणपञ्चम्यामपि न दोषः इति।

अत्र वाक्यार्थचन्द्रिकाकृतः[2]।

केचित्तु लावस्थायामेव स्यतासीविहितपञ्चम्या च तिबादय इत्येव युक्तम्। अन्यथा देविता, देविष्यति इत्यादावन्तरङ्गत्वात् तिबादिषु प्रवर्तयिष्यमाणोः स्यतास्योः स्वविषये सर्वत्र प्रसक्तस्य शपो बाधनेन कृतार्थयोः परत्वाच्छत्रादिभिर्बाधापत्तिरिति भाष्यकारोद्भावितदोषस्य दुर्वारत्वापत्तेः। यदि तु श्यन्नादिविधौ शब्ग्रहणानुवृत्ति विभक्तिविपरिणामाभ्यां श्यन्नादीनां शबादेशत्वाभ्युपगमेन तद्दोषपरिहार इत्युच्यते,तर्हि क्लेशः स्पष्ट एव।

किञ्च लादेशानामुक्तप्रकारेणान्तरङ्गत्वात् प्रथमतः प्रवृत्तिरित्यप्युक्तम्। स्यतास्योरपि लृलुडंशे प्रतिपदोक्तत्वेन अन्तरङ्गत्वास्य सुवचत्वात्। न चोभयोरन्तरङ्गयोः परत्वं व्यवस्थापकमिति पूर्वं तिबादय इति वाच्यम्। स्यातास्योः कृताकृतप्रसङ्गित्वेन नित्यत्वात्। तिबादयो हि स्यतास्योः प्रवृत्तौ तद्व्यवधानाल्लकारस्य न प्रवर्तन्त इत्यनित्याः। अपि च दिग्योगपञ्चम्याश्रयणे लविषीष्ट इत्यादौ परत्वात्प्रतिपदोक्तत्वाच्च प्रथमतः सीयुटि धातोरव्यवहितस्य निर्दिश्यमानस्य लस्याभावाल्लादेशापत्तिरिति स्पष्टं **"आद्युदात्तश्च[3]"** इति सूत्रे आकरे।

---

1 अष्टा. १-३-१२

2प.शे (वाक्यार्थचन्दिकासहितः), पृ -२४०

3 अष्टा. ३-१-३

तस्मादिह यद्वा इत्यादिपक्षः चिन्त्यः इत्याहुः। एवञ्च यद्वा इति पक्षः नागेशाभिमतः इति चन्द्रिकाकारणामाशयः।

४.४. असिद्धं बहिरङ्गमन्तरङ्गे

परिभाषायाम् अङ्गशब्दविचारः

व्याकरणशास्त्रे अत्यन्तं प्राधान्यं वहति परिभाषेयम् **असिद्धं बहिरङ्गमन्तरङ्गे**[1] इति। अन्तरङ्गे कार्ये कर्तव्ये बहिरङ्गकार्यासिद्धम् = अप्रवृत्तवत् भवतीति परिभाषार्थः। उदा- पचावेदम्। पच् धातोः परस्मैपदिनः लोटि उत्तमपुरुषद्विवचने पचाव इति रूपम्। अत्र इदं शब्दस्य योजने **"आद्गुणः[2]"** इति सूत्रेण गुणे कृते पचावेदम् इति सिद्ध्यति। अत्र एधावहै, एधामहै इत्यादाविव एकारस्य स्थाने **"एत ऐ[3]"** इति सूत्रेण ऐ आदेशः प्राप्नोति। तथा च विकृतरूपमापद्येते। एतद्दोषवारणाय इयं परिभाषा स्वीक्रियते। तथा च अन्तरङ्गे ऐ आदेशे कर्तव्ये बहिरङ्गस्य गुणस्य = एकारस्य असिद्धत्वात्, ऐकारादेशः न प्रवर्तते। प्रकृतपरिभाषायां बहिरङ्गस्यासिद्धत्वं द्विविधं भवति।

१.जातस्य बहिरङ्गस्य असिद्धत्वम्।

२.समकालप्राप्तस्य बहिरङ्गस्य असिद्धत्वम्।

जातस्य बहिरङ्गस्य असिद्धत्वस्य उदाहरणं प्रागुक्तमेव। समकालप्राप्तस्य बहिरङ्गस्यासिद्धत्वे उदाहरणं यथा – पट्व्या। अत्र पटु+ ई+आ इत्यवस्थायाम् उकारस्य, ईकारस्य च स्थाने समकालमेव यणादेशः प्राप्तः, तत्र अन्तरङ्गत्वात् पूर्वयणादेशः आदौ प्रवर्तते, तदुत्तरं द्वितीयः यणादेशः।

जातस्य बहिरङ्गशास्त्रस्यासिद्धत्वे **"वाह ऊठ्[4]"** इति सूत्रस्थं ऊठ् ग्रहणं ज्ञापकम्। तथा समकालप्राप्तस्य बहिरङ्गत्वस्यासिद्धत्वे **"ओमाङोश्च[5]"** इति सूत्रे आङ् ग्रहणं ज्ञापकम्।

---

1 परिभाषेन्दुशेखरः, परि.सं.५०, पृ -२३७

2 अष्टा. ६-१-८७

3 अष्टा. ३-४-१३

4 अष्टा. ६-४-१३२

5 अष्टा. ६-१-९५

अस्यां परिभाषायां अङ्गशब्देन निमित्तं गृह्यते। तथा-च बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्येऽन्तर्भूतानि निमित्तानि यस्य तत् = अन्तरङ्गमिति एवं अन्तर्भूतनिमित्तसमुदायात् बहिर्भूतनिमित्तकं कार्यं बहिरङ्गमिति च सिद्ध्यति। अयमंशः **"खरवसानयोर्विसर्जनीयः"**[1] **"असिद्धवत्राभात्"**[2](६-४-२२) इति सूत्रे च स्पष्टं भाष्यकैयटयोः निरूपितः। शब्दशास्त्रे शब्दस्यैव प्राधान्येन अत्र परिभाषायाम् अङ्गशब्देन शब्दरूपं निमित्तमेव स्वीक्रियते इति मूले निरूपितम्।

अत्र नागेश गूढार्थदीपिकाकाराः[3]

मूलग्रन्थे प्रागुक्तस्याशस्य अत्रेदं **बोध्यम्** इत्यादिना विस्तरेण व्याख्यानं विहितं शास्त्रिपादैः। तद्यथा – अत्र निमित्तवाच्यङ्गपदेन सूत्रे षष्ठ्यन्तोपात्तस्य उद्देश्यस्य न ग्रहणम्। कार्यमनुभवन्निति परिभाषाया कार्यिणो निमितत्त्वायोगात्। न च गुणानाञ्च परार्थत्वादिति न्यायेन तन्न्यायस्यात्राप्रवृत्तिरिति वाच्यम्। तन्न्यायस्यानित्यत्वेनेहाप्रवृत्तेः। किञ्चास्य न्यायस्य लोकसिद्धत्वेनोभयोस्समत्वाभावेन च तदप्रवृत्तिः। किञ्चात्राङ्गपदेनोद्देशस्यापि ग्रहणे **"ऊकालोऽज्झ्रस्वदीर्घप्लुतः**[4]" इति सूत्रे ऊकाल इति निर्देशासङ्गतिः। **"ह्रस्वो नपुंसके प्रातिपदिकस्य**[5]" इति सूत्रविहितनपुंसकह्रस्वस्यापरनिमित्तकत्वेनान्तरङ्गत्वेऽपि तन्निमित्तभूतप्रातिपदिक-घटाकज्निमित्तकत्वेन सवर्णदीर्घस्याप्यन्तरङ्गत्वादुभयोरन्तरङ्गयोः परत्वात् सवर्णदीर्घे ततो ह्रस्वो ह्रस्वस्यैव श्रवणापत्तेः। किञ्चैवं सति नन्वेवं असुस्त्रुवदित्यादावुवङ्गोऽल्पनिमित्तत्त्वाभावादुवङ् न स्यात् इति आशङ्क्य तस्य पूर्वोपस्थितनिमित्तकत्वरूपान्तरङ्गत्वप्रतिपादनपरमूलग्रन्थासङ्गतिः। तत्र लघूपधगुणोद्देश्यभूताङ्गघटकाजादिप्रत्ययनिमित्तकत्वेनोवङोऽन्तरङ्गतायाः स्पष्टतया तत्र शङ्कया एवानवकाशात्। अत एव पूर्वस्थानिकस्यान्तरङ्गत्वखण्डनावसरे परिभाषायामङ्गशब्दस्य निमित्तपरत्वाच्च इति वक्ष्यमाणग्रन्थसङ्गतिः। अत एव च

---

1 व्या.म.भा.(ष.भा),पृ -१५९

2 व्या.म.भा(प्र.भा),पृ -२७३

3 प.शे(नागेशगूढार्थदीपिकासहितः), पृ -२३९,२४०

4 अष्टा. १-२-२७

5 अष्टा. १-२-४७

ऊनशब्दमाश्रित्य इत्यादि "**येन विधिस्तदन्तस्य**[1]" इति सूत्रभाष्यव्याख्यावसरे अनेन हि भाष्येण परिभाषायामङ्गशब्दो निमित्तपरो, न तु स्थान्यादिपरोऽपि इति सूचयति इति उद्योतग्रन्थस्यापि सङ्गतिरिति बोध्यम्[2] – इति।

अत्र विचारः

एतावताऽस्यां परिभाषायां निमित्तवाचिनाङ्गशब्देन सूत्रे षष्ठ्यन्तोपात्तस्य उद्देश्यस्य न ग्रहणमिति सिद्धम्। अत्र यद्यपि प्रश्नोऽयमुदेति एवं सति दुद्यूषति सुस्यूषति इत्यादिरूपासिद्धिः। तत्र अपरनिमित्तकत्वेनान्तरङ्गत्वात् ऊठः पूर्वं द्वित्वे अभ्यासे ऊकारश्रवणानापत्तेः। षष्ठ्यन्तोपात्तस्यापि निमित्तत्वे तु द्वित्वनिमित्तभूत सन्नन्तसमुदायघटकनिमित्तकत्वेनोठोऽप्यन्तरङ्गत्वादुभयोरप्यन्तरङ्गतायाः स्वीकारेण द्विःप्रयोगरूपद्विर्वचनस्यातथात्वेन द्वित्वस्यान्तरङ्गत्वाभावेन नास्य प्रश्नस्य उत्थितिः। अत एव "**नामि**[3]" इत्यत्र आमि इति न्यासे राम+आम् इति स्थिते नित्यत्वात् "**सुपि च**[4]" इति दीर्घे "**ह्रस्ववद्यापो नुट्**[5]" इति नुट् न स्यादित्याशङ्क्य भूतपूर्वगत्या स्पष्टैव। अत एव "**विप्रतिषेधे परं कार्यम्**[6]" इति सूत्रे भाष्ये[7] **अन्तरङ्गं बहिरङ्गाद्बलीय** इति परिभाषाफलनिरूपणावसरे दुद्यूषति, सुस्यूषतीत्यत्र द्विर्वचनयणादेशयोर्युगपत् प्राप्तिमाशङ्क्यान्तरङ्गत्वात् यणादेश इत्युक्तम्। ऊठः प्रागेवापरनिमित्तकत्वेनान्तरङ्गत्वात् द्वित्वप्रवृत्तौ तु तदसङ्गतिः स्पष्टैव। तेन भाष्येण षष्ठ्यान्तोपात्तस्याप्यङ्गपदेन ग्रहणमित्येव कल्पयितुं शक्यमिति तु न युक्तम्। उपदर्शितसूत्रभाष्यादि विरोधापत्तेः इति। इत्थमत्र परिभाषायाम् अङ्गशब्देन निमित्तं ग्राह्यम् इति सुस्पष्टं लभ्यते।

---

1 अष्टा. १-१-७२

2 व्या.म.भा(प्र.भा), पृ -५६७

3 अष्टा. ६-४-३

4 अष्टा. ७-३-१०२

5 अष्टा. ७-१-५४

6 अष्टा. १-४-२

7 व्या.म.भा(प्र.भा), पृ -२०७,२०८

४.४.१ संज्ञानिमित्तकस्य बहिरङ्गत्वाभावे उदाहरणप्रदर्शने तत्तन्मतविचारप्रदर्शनम्

असिद्धं बहिरङ्गमन्तरङ्गे[1] इत्यत्र अङ्गशब्दः निमित्तबोधकः। शब्दशास्त्रे शब्दस्यैव प्राधान्येनात्र परिभाषायामङ्गशब्देन शब्दरूपं निमित्तमेव गृह्यते। तेन अर्थनिमित्तकस्य न बहिरङ्गत्वम्। अत एव गौधेरः,पचेत् इत्यादि रूपाणि सिद्ध्यन्ति। तथा हि - गोधायाः अपत्यमित्यर्थे गोधाशब्दात् षष्ठ्यन्तात् "**गोधाया ढ्रक्**[2]" इति सूत्रेण ढ्रक् प्रत्यये, ककारस्यानुबन्धलोपे, आदिवृद्धौ "**आयनेयीनीयियः फढखछघां प्रत्ययादीनाम**[3]" इति सूत्रेण ढस्य स्थाने एयादेशे, "**लोपो व्योर्वलि**[4]" इति यलोपे "**यस्येति च**[5]" इत्याकारलोपे गोधेरे जाते, ततः सु प्रत्यये विसर्गे च गौधेरः इति रूपम्। अत्रान्तरङ्गे यलोपे कर्तव्येऽङ्गसंज्ञासापेक्षत्वेन एयादेशस्य बहिरङ्गत्वेन असिद्धत्वात् लोपो न स्यादिति तु न। प्रागुक्तरीत्या संज्ञानिमित्तकस्य बहिरङ्गत्वाभावात्। एवं पचेदित्यत्रापि पच् धातोः विधिलिङ् प्रथमपुषैकवचने तिबादेशेऽनुबन्धलोपे "**इतश्च**[6]" इति इकारलोपे शपि "**यासुट् परस्मैपदेषूदात्तो ङिच्च**[7]" इति यासुडागमे "**सुट् तिथोः**[8]" इति सुडागमे च "**लिङः सलोपोऽनन्त्यस्य**[9]" इति सकारद्वयस्य लोपे, "**अतो येयः**[10]" इति या इत्यस्य स्थाने इयादेशे "**आद्गुणः**[11]" इति गुणे वलि लोपे च पचेदित्यभीष्टं रूपम्। अत्राप्यन्तरङ्गे यलोपे कर्तव्येऽङ्गसंज्ञानिमित्तकत्वेन इयादेसस्यासिद्धत्वं तु न। प्रागुक्तरीत्या संज्ञानिमित्तकत्वस्य बहिरङ्गत्वाभावात्। अनया रीत्या संज्ञानिमित्तकस्य बहिरङ्गत्वेनानाश्रयणे गौधेरः, पचेदित्याद्युदाहरणद्वयं मूले प्रदर्शितम्।

---

1 परिभाषेन्दुशेखरः,परि.सं -५०,पृ -२३७

2 अष्टा. ४-१-१२९

3 अष्टा. ७-१-२

4 अष्टा. ६-१-६६

5 अष्टा. ६-४-१४८

6 अष्टा. ३-४-१००

7 अष्टा. ३-४-१०३

8 अष्टा. ३-४-१०७

9 अष्टा. ७-२-७९

10 अष्टा. ७-२-८०

11 अष्टा. ६-१-८७

अत्र गदाकृन्मतम्[1]

एवं स्थिते मूले क्वचित् पचेदित्यस्य स्थाने पचेरन् इति पाठः दृश्यते। किन्तु नायं पाठः साधुः। **"लिङः सीयुट्"**[2] इति सूत्रविहितस्य सीयुडागमस्य अङ्गाधिकारस्थत्वाभावेन एयादीनामङ्गसंज्ञापेक्षत्वेन इति मूलग्रन्थासङ्गत्वापत्तेः। अतः अत्र पचेत् इत्येव पाठः।

अत्र नागेशगूढार्थदीपिकाकाराः[3]

प्राक्प्रदर्शितः गदाकाराणामाशयः नागेशगूढार्थदीपिकायामपि समर्थितः। अत्र विषये उभयोरनयोर्व्याख्यात्रोः ऐकमत्यं प्रतीयते।

अत्र समीक्षा

गदायुते सर्वमङ्गलायुते[4] हैमवतीयुते[5] विजयायुते[6] नागेशगूढार्थदीपिकायुते[7] च मूले पचेदित्येवपाठः दृश्यते तत्समर्थनमपि व्याख्यातृभिः स्पष्टमेव विहितम्। किन्तु वाक्यार्थचन्द्रिकायुते[8] भैरवीयुते[9] च मूले पचेरन् इत्येव पाठः दृश्यते। सीयुडागमस्य अङ्गाधिकारस्थत्वाभावः यद्यपि गदायां नागेशगूढार्थदीपिकायां च प्रदर्शितः, तथापि एयादीनामङ्गसंज्ञासापेक्षत्वेन इति मूले अङ्गपदं धातोरपि उपलक्षणम्। एवञ्च सीयुटः धात्वधिकारपठितत्वेन अन्तरङ्गे वलि लोपे कर्तव्ये धातुसंज्ञानिमित्तकस्य सीयुटः न बहिरङ्गत्वमित्येवं व्याख्यातुं शक्यते। अतः उपलक्षणपरतया व्याख्यानेन पचेरन् इति पाठस्यापि साधुत्वं प्रतिपादयितुं शक्यत इति ममाभिप्रायः।

1प.शे(गदासहितः),पृ -८६

2 अष्टा. ३-४-१०२

3 प.शे(नागेशगूढार्थदीपिकासहितः), पृ -२४२

4 प.शे(सर्वमङ्गलासहितः), पृ -१८४

5 प.शे(हैमवतीसहितः), पृ -१५७

6 प.शे(विजयासहितः), पृ -१८६

7 प.शे(नागेशगूढार्थदीपिकासहितः),पृ -२४२

8 प.शे(वाक्यार्थचन्द्रिकासहितः), पृ -२५४

9 प.शे(भैरवीसहितः), पृ -११८

४.४.२. अङ्गशब्देन उद्देश्यस्यापि ग्रहणण् इत्यत्र मतभेदः

असिद्धं बहिरङ्गमन्तरङ्गे[1] इति परिभाषायामङ्गशब्दः निमित्तपर्यायः। तच्च निमित्तं शब्दरूपमेव गृह्यते। शब्दशास्त्रे प्रधानात्वात् इति नागेशोपाध्यायेन स्पष्टीकृतम्।

अत्र वक्यार्थचन्द्रिकाकाराः[2]

उद्देश्यास्यापि निमित्तत्वेन ग्रहणम्। अङ्गशब्दस्य उपकारमात्रबोधकत्वात्।एवं सति **कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते**[3] इति परिभाषाया विरोधस्तु न। "**वाह ऊठ्**[4]" इति सूत्रे ऊठ् ग्रहणेन एतत्परिभाषाज्ञापनपरभाष्यप्रमाण्येन तस्याः परिभाषायाः अत्राप्रवृत्तेः। तथा हि विश्वं वहति इत्यर्थे विश्व इति कर्मोपपदपूर्वकात् वह प्रापणे इति धातोः "**वहश्च**[5]" इति सूत्रेण ण्वि प्रत्ययः, स च सर्वलोपी। प्रत्ययलक्षणेन णित्परत्वमादाय "**अत उपधायाः**[6]" इति वृद्धौ विश्ववाह् इति जाते समुदायस्य कृदन्तत्वेन "**कृत्तद्धितसमासश्च**[7]" इति प्रातिपदिकमाश्रित्य "**सुपोधातुप्रातिपदिकयोः**[8]" इति अमो लुकि विश्ववाह् इति समुदायात् द्वितीयाहुचतिवविवक्षायां "**स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्**[9]" इत्यादीनां शसि शकारस्यानुबन्धलोपे, "**वाहः**[10]" इति सूत्रेण वकारस्य संप्रसारणे ऊठि, ठस्यानुबन्धलोपे, "**सम्प्रसारणाच्च**[11]" इति पूर्वरूपे "**एत्येधत्यूठ्सु**[12]" इति सूत्रेण

---

1 परिभाषेन्दुशेखरः,परि.सं.- ५०,पृ -२३७

2 प.शे(वाक्यार्थचन्द्रिकासहितः), पृ - २५३

3 परिभाषेन्दुशेखरः,परि.सं – १०,पृ -६०

4 अष्टा. ६-४-१३२

5 अष्टा. ३-३-६४

6 अष्टा. ७-२-११६

7 अष्टा. १-२-४६

8 अष्टा. २-४-७१

9 अष्टा. १-१-२

10 अष्टा. ४-१-६१

11 अष्टा. ६-१-१०८

12 अष्टा. १-१-८९

वृद्धौ विश्वौहस् इति जाते सस्य रुत्वे विसर्गे च विश्वौहः इति रूपम्। अत्र ण्वि-शसोः परस्परम् अनन्तर्भूतत्वेन एतत्परिभाषाज्ञापनपरभाष्यासङ्गतिः।

षठ्यान्तोपात्तस्य उद्देश्यस्यापि ग्रहणे तु "**पुगन्तलघूपधस्य च**[1]" इति लघूपधगुणोद्देश्यघटितसुदायोद्देश्यकस्य सम्प्रसारणस्य बहिरङ्गत्वम्। सम्प्रसारणोद्देश्यघटकसमुदायोद्देश्यकस्य परिभाषायाः प्रवृत्तेः सौलभ्यात् न प्रगुक्तविरोधेः। एवं च अङ्गशब्देन अद्देश्यस्यापि लघूपधगुणस्यान्तरङ्गत्वमिति ग्रहणम्। किञ्च परिभाषायामङ्गशब्देन उद्देश्यस्याग्रहणे सुस्यूषति इति रूपासिद्धिः। तथा हि सिव् धातोः "**धातोः कर्मणः समानकर्तृकादिच्छायां वा**[2]" इति सन् "**प्रत्येये सन्यङोः**[3]" इति सूत्रेण द्वित्वम्, "**च्छ्वोः शूडनुनुनासिके च**[4]" इति वकारस्य ऊठादेशश्च प्राप्तः। तत्र अपरनिमित्तक्तवेनान्तरङ्गत्वात् ऊठः पूर्वं द्वित्वे,ततः ऊठि सिस्यूषति इत्येव स्यात्। तथा च अभ्यासे उकारस्य श्रवणानापत्तिः। प्रागुक्तरीत्या उद्देश्यस्यापि निमित्तत्वेन आश्रयणे तु द्वित्वनिमित्तभूतसन्नन्तसमुदायघटकनिमित्तकत्वेन ऊठोऽपि अन्तरङ्गत्वात् उभयोरन्तरङ्गयोः असिद्धपरिभाषायाः अप्रवृत्त्या "**विप्रतिषेधे परं कार्यम्**[5]" इति परत्वात् ऊठ् प्रवर्तते, अत एव सुस्यूषति इति रूपं सिद्ध्यति। एवञ्चोद्देश्यस्यापि निमित्तत्वेनाश्रयणं कर्तव्यमेव इत्यभिप्रयन्ति।

अत्र नागेशगूढार्थदीपिकाकाराः[6]

नागेशगूढार्थदीपिकाकारास्तु प्रागुक्तं नानुमन्यन्ते, तथा हि-

१. निमित्तवाचिनाङ्गपदेन षष्ठ्यन्तोपात्तश्च उद्देश्यस्य न ग्रहणम्। **कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते**[7] इति परिभाषया कार्यिणः। निमित्तत्वायोगात्। **गुणानां च परार्थत्वादसंबन्धः समत्वात् स्यात्** इति न्यायेन कार्यमनुभवन् इति परिभाषायाः नात्र प्रवृत्तिः इति तु न वक्तुं शक्यते। **गुणानां च परार्थत्वात्** इति न्यायस्य

---

1 अष्टा. ७-३-७६

2 अष्टा. ३-१-०७

3 अष्टा. ६-१-९

4 अष्टा. ६-४-१९

5 अष्टा. १-४-२

6 प.शे(नागेशगूढार्थदीपिकासहितः),पृ - २४७

7 परिभाषेन्दुशेखरः,परि.सं -१०, पृ -६०

अनित्यत्वेनात्राप्रवृत्तेः। अपि च अस्य न्यायस्य लोकन्यायसिद्धत्वेन उभयोः समत्वाभावेन च तन्यायस्य अत्राप्रवृत्तिः।

२. किञ्चात्र परिभाषायामङ्गशब्देन उद्देश्यस्यापि ग्रहणे "**ऊकालोऽज्झ्रस्वदीर्घप्लूतः**[1]" इति सूत्रे ऊकालः इति निर्देशस्यासङ्गत्यापत्तिः। तथा हि "**ह्रस्वो नपुंसके प्रातिपदिकस्य**[2]" इति सूत्रविहितह्रस्वस्यत्वस्यापरनिमित्तकत्वेन अन्तरङ्गत्वेऽपि तन्निमित्तभूतप्रातिपदिकघटकन्निमित्तकत्वेन सवर्णदीर्घस्याप्यन्तरङ्गत्वात् उभयोरन्तरङ्गयोर्विषये असिद्धपरिभाषायाः अप्रवृत्त्या "**विप्रतिषेधे परं कार्यम्**[3]" इति परत्वात् सवर्णदीर्घे, ततः ह्रस्वे "**ऊकालोऽज्झ्रस्वदीर्घप्लुतः**[4]" इति ह्रस्वस्यैव श्रवणं प्रसज्यते।

३. किञ्चैवं सति नन्वेमसुस्रुवदित्यादावुवङोऽल्पनिमित्तकत्वाभावावह् न स्यात् इत्याशङ्क्य पूर्वोपस्थितनिमित्तकत्वरूपत्वरूपान्तरङ्गत्वप्रतिपादनपर-मूलग्रन्थासङ्गतिः। तत्र लघूपधगुणोद्देश्यघटकाजादिप्रत्ययनिमित्तकत्वेन उवङ्गादेशे अन्तरङ्गत्वस्य स्पष्टतया उक्तशङ्कायाः एव अनवकाशात्।

४. अत एव पूर्वस्थानिकस्यान्तरङ्गत्वखण्डनावसरे परिभाषायामङ्गशब्दस्य निमित्तपरत्वाच्च इति च मूलग्रन्थस्या सङ्गत्यापत्तिः।

५. अत एव च ऊनशब्दमाश्रित्य... इत्यादि पङ्क्तिव्याख्यानावसरे "**येन विधिस्तदन्तस्य**[5]" इति सूत्रभाष्ये अनेन हि भाष्येण परिभाषायामङ्गशब्दो निमित्तपरः,न तु स्थान्यादिपरोऽपीति सूचयति। इत्यादिः उद्योतग्रन्थः[6] सङ्गच्छते।

६. किञ्च सुस्यूषति इत्यादि रूपसिद्ध्यर्थम् उद्देश्यस्यापि निमित्तत्वेनाश्रयणीयमिति कथनमपि न युज्यते इति केचन अभिप्रयन्ति तथा हि धर्मिग्राहकसजात्यात् अपरनिमित्तकस्यादेशविधायकस्यैवान्तरङ्गतायाः स्वीकारेण द्विः प्रयोगरूपद्विर्वचनस्यातथत्वेन द्वित्वस्य अन्तरङ्गत्वाभावात्। एवञ्च अत्र ऊठ एव पूर्वं

---

1 अष्टा. १-२-१७

2 अष्टा. १-२-४७

3 अष्टा. १-४-२

4 अष्टा. १-२-२७

5 अष्टा. १-१-७२

6व्या.मा.भा(प्र.भा), पृ.-५६७

प्रवृत्त्या सुस्यूषति इत्यादि रूपं सिद्ध्यति। अतः एतादृशरूपसिद्ध्यर्थमुद्देश्यस्यापि निमित्तत्वेनाश्रयणमिति कल्प वृथैव – इति।

अत्र समीक्षा

गुणानां च परार्थत्वादिति न्यायमाश्रित्य अङ्गशब्देन उद्देश्यस्य ग्रहणं नास्ति। अत एव **कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते**[1] इति परिभाषायाः अप्रवृत्तिकल्पनं नात्र युक्तम्। प्रागुक्तरीत्या तस्य न्यायस्यानित्यत्वात्।

अन्तरङ्गपरिभाषायामङ्गशब्देन पूर्वोपस्थितनिमित्तकत्वरूपमन्तरङ्गत्वं समाश्रीयत श्रीमता नागेशभट्टेन। उद्देश्यस्यापि निमित्तत्वेन ग्रहणे तादृशार्थकल्पनायाः आवश्यकतैव न स्यात्।

किञ्च मूलग्रन्थे परिभाषायामङ्गशब्दस्य निमित्तपरत्वाच्च इति कथयता नागेशेन स्पष्टमेव अङ्गशब्दस्य निमित्तपरत्वं यद्बोधितं तदसङ्गतं स्यात्।

किञ्च **"येन विधिस्तदन्तस्य**[2]" इति सूत्रे भाष्यप्रदीपोद्योते स्पष्टमेव नागेशभट्टेनाङ्गशब्दस्य निमित्तपरत्वमेव भणितम्।

किञ्च सुस्यूषति इत्यादिरूपसिद्ध्यर्थमपि उद्देश्यस्य निमित्तत्वेन ग्रहणमनावश्यकम्। तत्र अन्तरङ्गत्वात् ऊठः प्रवृत्त्या अभीष्टरूपसिद्धेः।

४.४.३. परम्परया निमित्तत्वमादाय बहिरङ्गत्वस्य आश्रयणाभावविचारः

संज्ञाकृतं बहिरङ्गत्वं नाश्रीयते इत्यत्र **"न लोपः सुप्स्वरसंज्ञातुग्विधिषु कृति**[3]" इति सूत्रे कृति तुग्ग्रहणे ज्ञापकत्वेन प्रदर्शितम्। अन्यथा अन्तरङ्गे क्ङिन्निमित्तके **"ह्रस्वस्यस्य पिति कृति तुक्**[4]" इति तुगागमे कर्तव्ये बहिर्भूत भ्यान्निमित्तकसंज्ञानिमित्तकत्वेन बहिरङ्गस्य नकारलोपस्य असिद्धत्वेन ह्रस्वान्तत्वाभावात् तुगागमस्य अभावे तद्वरणार्थं पुनः अस्मिन् सूत्रे क्रियमाणे कृति तुग्ग्रहणं व्यर्थं सत् कृतबहिरङ्गत्वस्य अनाश्रयणत्वं बोधयति। ज्ञापनोत्तरं संज्ञानिमित्तकस्य बहिरङ्गत्वेन आश्रयणात् नलोपस्य असिद्धत्वाभावे

---

1 परिभाषेन्दुशेखरः,परि.सं – १०, पृ -६०

2 अष्टा. १-१-७२

3 अष्टा. ८-२-२

4 अष्टा. ६-१-७१

ह्रस्वान्तत्वमादाय प्राप्तस्य तुगागमस्य वारणार्थं क्रियमाणां च तुग्ग्रहणं चरितार्थं भवति।

अत्र प्रश्नः

संज्ञाकृतबहिरङ्गत्वस्यानश्रयणे दोष एव। तुगागमनिमित्तभूत क्विप् अपेक्षया बहिर्भूत भ्याम् निमित्तकत्वेन बहिरङ्गतया नलोपस्यासिद्धत्वेन सूत्रे कृति तुग्ग्रहणं व्यर्थमेव इति।

अत्रोत्तरम्

भ्याम्प्रत्ययस्य पदसंज्ञानिमित्तत्वेऽपि नकारलोपस्य साक्षात् तन्निमित्तकत्वाभावात् दोषः। न च भ्याम्प्रत्ययस्य साक्षात् नकारलोपे निमित्तत्वाभावेऽपि परम्परया तन्निमित्तत्वमस्त्येव इति वाच्यम्। परम्परया निमित्तत्वमादाय बहिरङ्गत्वं नाश्रीयते इत्यंशः "**नलोपः सुस्परसंज्ञातुग्विधिषु**[1]" इति सूत्रे भाष्ये ध्वनितः।

नागेशगूढार्थदीपिकाकाराः[2]

परम्परयानिमित्तत्वमादाय बहिरङ्गत्वानाश्रयणीयमियंशः भाष्ये[3] यथा ध्वनितःते शास्त्रिचरणाः विशदीचक्रुः। तद्यधा- तत्र हि कृति तुग्विधौ वृत्रहभ्यामित्यादिफलमुक्त्वा "**कृन्मेजन्त**[4]" इति सूत्रेऽस्य सन्निपातपरिभाषाफलत्वेनोक्तत्वात्तमाश्रित्यास्यैतत्फलत्वं आम्रेडितम्। अन्यथानयैव परिभाषाया निर्वाहे तत्परिभाषोपन्यासे भगवतो निर्बीजत्वापत्तिः इदं ध्वनितमिति भावः। तथा च क्वचित् ज्ञापकपरभाष्यप्रमाण्यात्पराम्परया सत्तत्वमादायैतत्पववृत्तावपि न सर्वत्र तथा प्रवृत्तिरिति बोध्यम्।

---

1 अष्टा. ८-२-२

2 प.शे(नागेशगूढार्थदीपिकासहितः),पृ -२५१

3 व्या.म.भा(प्र.भा), पृ -८०,८३

4 अष्टा. १-१-३९

अत्र समीक्षा

"**कृन्मेजन्तः**[1]" इति सूत्र भाष्ये[2] सन्निपातपरिभाषायाः प्रयोजनानां कथनावसरे ग्रमणि कुलम् इत्यादौ "**ह्रस्वस्य पिति कृति तुक्**[3]" इति सूत्रेण तुग्वारणमपि नियतप्रयोजनत्वेन वर्णितम्। वस्तुतस्तु अन्तरङ्गपरिभाषया तत्र तुगागमस्य वारणसंभवात् तत् प्रकृतपरिभाषायाःप्रयोजनमित्याशयेन नैतदस्ति प्रयोजनम्। बहिरङ्गं ह्रस्वत्वम्,अन्तरङ्गस्तुक्। असिद्धंबहिरङ्गमन्तरङ्गे इत्युक्तं भगवता भाष्यकृता। तत्र कैयटो वर्णयामास प्रकृते सन्निपातपरिभाषायाः आश्रयणे ग्रमणिच्छत्रम् इत्यत्रापि तुगागमः न स्यात्। अतः अन्तरङ्गपरिभाषया एव ग्रामणि कुलमित्यादौ तुगागमो वारणीयः इति। एतदाशयः उद्योतकारेणापि समर्थितः। "**नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति**[4]" इति सूत्रे भाष्ये[5]कैयटोद्योतयोरपि अयमंशः स्पष्टो भवति सूक्ष्मदृशाम्।

४.४.४. ऊठ् ग्रहणस्य प्रकृतपरिभाषाव्यापकत्वाभावशङ्का,मतान्तरनिराकारपूर्वकं तत्समाधानं च

अत्र शङ्का

विश्वौहः विश्वौहेत्यादौ "**उडिदंपदाद्यप्पुम्रैद्युभ्य**[6]" इत्यसर्वनामस्थानविभक्त्युदात्तवसम्पादनार्थमूठ्ग्रहमस्यावश्यकत्वात्कथं तद्वैयर्थ्यम्। न च "**तस्मादित्युत्तरस्य**[7]" इति परिभाषया तत्राव्यवहितत्वांशोपस्थित्या सत्यप्यूठ्ग्रहणे तादृशस्वरो दुर्लभ एवेति कृतस्तदर्थमूठ्ग्रहणमिति वाच्यम्। प्रतुर इत्यादौ स्वरसिद्ध्यर्थम् ऊठ्युपधाग्रहणं कर्तव्यम् इति वार्त्तिकबलात्तत्राव्यतवहितत्वांशबाधकल्पनाया आवश्यकत्वात्। नैवमपि वार्त्तिके उपधापदसत्त्वेन प्रतिपदोक्तपरिभाषाया उपधामुच्चार्य विहितस्य

---

1 अष्टा. १-१-३९

2व्या.म.भा(प्र.भा), पृ -३५९,३६०

3 अष्टा. ६-१-७१

4 अष्टा. ७-२-२

5 व्या.म.भा(प्र.भा), पृ -८०,८३

6 अष्टा. ६-१-१७१

7 अष्टा. १-१-६

"**ज्वरत्वरस्त्रिव्यविमवामुपधायाश्च**[1]" इति सूत्रेण ऊठ् एव ग्रहणं न "**वाह ऊठ्**[2]" इति तत्र स्वरो दुर्लभ एवेति वाच्यम्। उठ्युपाधग्रहणमन्त्यप्रतिषेधार्थम्। न्यायस्यमाभूदक्षद्युवा अक्षद्युवे इति वार्त्तिकफलप्रदर्शनपरभाष्या[3] सङ्गत्या तत्परिभाषाया नित्यत्वे नात्राप्रवृत्तिरेव न्याय्यत्वात्। अन्याथा अन्त्यानन्त्यसाधारण्येन निवारणरूपफलप्रदर्शनायानुपधाभूतस्य मा भूदित्येव वदेत्। तथा च स्वरार्थमूठस्यावश्यक्तवात्कथं तद्वैयर्थ्यम् इति।

अत्र केचित्[4]

ऊडिदमित्यत्र सवर्णदीर्घेणोकारं प्रश्लिष्योकारादूठश्च परा सर्वनामस्थानविभक्तिरुदात्तेत्यर्थेन इत्यादौ प्रतुर इत्यादौ च स्वरस्य सिद्धत्वात्। स चोकारस्साहचर्याद्वकारस्थानिक धतो धातुस्थश्च विवक्षित इति न तस्थुष इत्यादावतिप्रसङ्गः। तत्रोकारस्य भावात् इति वदन्ति।

अत्र वक्यार्थचन्द्रिकाकाराः

केचित्तु "**वाह ऊठ्**[5]" इति सूत्रे भाष्ये ऊडादिः कस्मान्नभवतीत्याशङ्क्य सम्प्रसारणपदानुवर्तनेन तस्यादेशत्वं समर्थितम्। ततो "**वाह ऊठ्**[6]" इत्यस्य ठित्वाभाव एव प्रतीयते। "**च्छ्वोः शूडनुनासिके च**[7]" इत्यस्य त्वादेशत्वसम्पदकोपायान्तराभावादागमत्वे दोषसम्भवाच्च ठित्वमेवेति तस्मिन्नेव सूत्रे भाष्ये स्पष्टम्। ततश्च दीर्घोच्चारणात्। तस्य हि वृद्धिविधौ कृतचर्त्वस्य च्छ्वोः शूठः सहग्रहणाविघातुकत्वमेव प्रयोजनम्। इदमेवाभिसन्धाय भाष्ये[8] धौतः इत्यत्र वृद्ध्यभावमाशङ्क्य चर्त्वे कृते भविष्यतीति परिहरता सिद्धान्तिना चर्त्वमसिद्धमित्येकदेशिनः शङ्कायामश्रयात्सिद्धत्वमिति परिहारः उक्तः।

---

1 अष्टा. ६-४-२०

2 अष्टा. ६-४-१३२

3 व्या.म.भा(ष.भा), पृ -१६०

4 प.शे(वाक्यार्थचन्द्रिकासहितः), पृ -२६७,२६९

5 अष्टा. ६-४-१३२

6 अष्टा. ६-४-१३२

7 अष्टा. ६-४-१९

8 व्या.म.भा(प्र.भा), पृ -३५०

तत्राश्रयादित्यस्य "**वाह ऊठ्**[1]" दीर्घेवैयर्थ्यमूलकतन्त्रनिर्देशप्रयुक्तात् "**च्छ्वोः शूडनुनासिके च**[2]" कृतचर्त्वस्यापि वृद्धिविधौ निमित्तकत्वेनाश्रयणादित्यर्थः। ततः तदुत्तरम् असत्यन्यस्मिन्नाश्रयात्सिद्धत्वमित्याशयानभिज्ञस्येकदेशिनः प्रश्नं परिजिहीर्षुणा सिद्धान्तिना "**वाह ऊठ्**[3]" अपि ठित्करिष्यते, आश्रयात्सिद्धत्वं भवतीत्युक्तम्। यत् उक्तरीत्या च्छ्वोः शुठः कृतचर्त्वस्यापि वृद्धिविधौ निमित्तत्वेनाश्रयणादसिद्धत्वाभावः। ततः "**वाह ऊठ्**[4]" अपि ठित्सदृशः, न तु तव्द्यावृत्तिप्रयोजकधर्मविशेषाश्रय इति तादशयः। अत एव "**वाह ऊठ्**[5]" अपि ठिदिति नोक्तम्। किञ्च द्वयोरपि ठित्त्वे वृद्धविधावुभयोष्ठान्तयोरनुकरणे लक्षणवशसम्पन्नमेव चर्त्वमिति कस्याप्याश्रयात्सिद्धत्वाभावादाश्रयात्सिद्धत्वमित्यस्यासङ्गतिरेव। यथा श्रुतार्थपर्यालोचनेन तद्भाष्यस्य चिन्त्यतां वदन् कैयटश्चिन्त्य एव। न चैवमपि उपेतः इत्यादौ वृद्धिवारणोपायत्वेन एचि इत्येतद्विशेषणसमन्वयाय योगविभागेन भाष्यकारोप्रदर्शिते न्यासे द्वयोरप्यसंग्रह इति वाच्यम्। योगविभागो हि यथाश्रुतस्य विभागकरणं न तु न्यासान्तरेण तथाकरणम्। ततश्च एधति इत्येको योगः, उठ्सु इति चापर इत्येव भाष्यतात्पर्यम्। उपदर्शितन्यासस्तदर्थोपपादनपर ऊठि इति च तत्रोपलक्षणमेवेत्यदोषात्। एवञ्च स्वरविधौ वार्त्तिकबलात् ठित एव ग्रहणम्। न तु टितः इति "**वाह ऊठ्**[6]" विषये स्वराप्रवृत्तिरेव। प्रकृतपरिभाषाज्ञापनपर "**वाह ऊठ्**[7]" सूत्रभाष्येणाप्ययमेवार्थो ध्वनितः स्वरांशे दोषानुद्भावनात्। वृत्तिकारादीनान्तु प्रमाद एवातो न ज्ञापकताभङ्गः इति वदन्ति।

---

1 अष्टा. ६-४-१३२

2 अष्टा. ६-४-१९

3अष्टा. ६-४-१३२

4 अष्टा. ६-४-१३२

5 अष्टा. ६-४-१३२

6 अष्टा. ६-४-१३२

7 अष्टा. ६-४-१३२

अत्र नागेशगूढार्थदीपिकाकाराः[1]

प्राग्विहितस्य प्रश्नस्य अत्र केचित् इत्यादिना केषाञ्चिन्मतेन समाधानमुक्त्वा ततः परं हरिशास्त्रिणस्तु इत्यादिना चन्द्रिकाकृतां मतं प्रतिपाद्य तदन्ते उपाध्यायानुयायिनस्तु इत्यारभ्य स्वीयं आशयं प्रादर्शयन्। यथा विश्वौह् इत्यादावपि स्वर इष्ट एव। तस्यापि ठित्वात्। अत एव **"ऊडिदंपदाद्यप्पुम्रैद्युभ्यः[2]"** इति सूत्रे ऊठ्युपधाग्रहणमन्त्यप्रतिषेधार्थमिति वार्तिकव्याख्यावसरे उद्योतकृता[3] तस्य विश्वौह् इत्युदाहरणमित्युक्तम्। ऊडादिः कस्मान्न भवतीति **"वाह ऊठ्[4]"** इति सूत्रस्थं भाष्यं तु यथाश्रुताष्टध्यायीपाठेन तस्य टित्वेऽपि दोषो नावतरतीति प्रदर्शनार्थमिति न तावता तस्य टित्वं वक्तुं युक्तम्। स्पष्टं चेदं तत्रैवोद्योते **"एत्येधत्युठ्सु[5]"** इत्यत्र विशेषणार्थं ठित्मावश्यकमिति च तत्रैव प्रदीपोद्योतयोः[6] स्पष्टम्। एवं च वाह ऊडित्यत्रोठ्ग्रहणाभावे उकारप्रश्लेषेण स्वरो भविष्यतीत्येव भाष्याशयोद्भावनीय इत्यत्राद्यपक्ष एव युक्त इति वदन्ति इति मन्यन्ते। एवं च ऊठ् ग्रहणस्य कृत परिभाषाज्ञापकत्वे नास्ति किञ्चिद्बाधकमिति सिद्ध्यति।

४.४.५. प्रौहः इत्यादौ विचोऽनभिधाने मतभेदप्रदर्शनम्

"वह ऊठ्[7]" इति सूत्रे उठ्ग्रहणेन **असिद्धं बहिरङ्गमन्तरङ्गे[8]** इति परिभाषा ज्ञाप्यते इति प्रतिपादितं प्राक्।

अत्र संशयः

ऊठ्ग्रहणं परिभाषायाः ज्ञापकं न भवति। तथा हि प्रौहः,शाल्युहः इत्यादि रूपसिद्ध्यर्थमूठ् ग्रहणस्यावश्यकत्वात्। अन्यथा प्रौहः इत्यत्र वृद्धिं बाधित्वा **"एङि पररूपम्[9]"** इति पररूपे तदसिद्धिः। शाल्युकः इत्यत्र तु ऊकाररूपदीर्घश्रवणानापत्तिः।

1प.शे(नागेशगूढार्थदीपिकासहितः),पृ -२५४

2 अष्टा. ६-१-१७१

3 व्या.म.भा(पं.भा), पृ -२८२,२८३

4 अष्टा. ६-४-१३२

5 अष्टा. ६-१-८९

6 व्या.म.भा(पं.भा), पृ -३५०

7 अष्टा. ६-४-१३२

8परिभाषेन्दुशेखरः,परि.सं -५०, २३७

9 अष्टा. ६-१-९४

अतः एतल्लक्ष्यसिद्ध्यर्थमूठ्ग्रहणमावश्यकमेवेति परिभाषायाः ज्ञापकत्वं कथं वा वक्तुं श्कयते इति।

अत्रोत्तरम्

अकारान्तप्रसङ्गे अनकारान्ते च उपपदे 'वह्' धातोः वहधातुप्रकृतिकणिजन्ताद्वा 'ण्वि' प्रत्ययः 'णिच्' प्रत्ययश्च न प्रवर्तते, अनभिधानात्। अत्र च ऊठ्ग्रहणेन अन्तरङ्गपरिभाषाज्ञापनापरं भाष्यमेव प्रमाणाम् इति। प्राक्प्रदर्शितः संशयः तत्समाधानं च मूलग्रन्थे एव उपलभ्यते।

अत्र वाक्यार्थचन्द्रिकाकाराः[1]

'उह्' दिक्षीऽनभिधानं चिन्त्यम्। मिलोपस्य स्थानिवत्वेनोडादेशप्रसङ्गात्। केचित्तु वाह् धातोः "इटनिधानिमित्याहुः" इति व्याख्यान्ति।

अत्र नागेशगूढार्थदीपिकाकाराः[2]

'वह्' धातोः अयन्तात् विचः अनभिधाने प्रमाणं तु छन्दस्येव ण्विः इति पक्षे उदन्तादिङ् इति "**सम्प्रसारणाच्च**[3]" इति सूत्रस्थकौमुदीग्रन्थः[4] प्रमाणम्।

वस्तुतस्तु "**विभाषा पूर्वाह्णापराह्णाभ्याम**[5]" इति सूत्रस्थभाष्यप्रमाण्यत् ण्विप्रत्ययविधायके "**वाहः**[6]" इति सूत्रे छन्दोग्रहणाननुवृत्तेः उक्तत्वेन तेनैव विश्ववाडित्यादिरूपाणां सिद्धत्वेन णिजन्तात् विच् अनावश्यकः। सत्यपि वा तस्मिन् (णिजन्तात् विचि) तेन विश्ववाट् इत्यस्य साधुमात्रमुच्यते। न तु अस्य उठ्, णिलोपस्य स्थानित्वात् इति लघुशब्देन्दुशेखरे उक्तत्वेन तत्र ऊठः अप्रवृत्त्या फलभेदस्य वक्तुमशक्यतया तस्य अनभिधानकथनमनावश्यकम्। अत एव उद्योते ण्वि इत्ययस्यैवानभिधानत्वमुक्तम्।

अत्र समीक्षा

---

1 प.शे(वाक्यार्थचन्द्रिकासहितः), पृ -२६९

2 प.शे(नागेशगूढार्थदीपिकासहितः),पृ -२५६

3 अष्टा. ६-१-१०८

4 प.शे(नागेशगूढार्थदीपिकासहितः),पृ -६९

5 अष्टा. ४-३-२४

6 अष्टा. ४-१-६१

१.विचः अनभिधाने प्रमाणं सिद्धान्तकौमुद्यनुसारेण व्याख्यातृभिः स्पष्टमेव प्रदर्शितम्। अत एव न चानकारान्तोपपदेऽकारान्तोपपदेऽकारान्तोसर्गौपपदे च रूपे विशेषः स्यादिति कथमूठ्ग्रहणं ज्ञापकमिति चेत्। अत्राहुः कैयटादयः भाष्यकारोक्तज्ञापकबलेनैव तादृशस्थले ण्विप्रत्ययाभावोऽनुमीयते इति इत्युक्तं तत्त्वबोधिन्याम्[1]। अत एव च अनेन लोके विश्ववाड् शब्दस्य साधुत्वमात्रमुच्यते, नत्वस्य ऊठ्। णिलोपस्य स्थानिवत्वात् इत्युक्तं "**सम्प्रसारणाच्च**[2]" इति सूत्रव्याख्यावसरे लघुशब्देन्दुशेखरे[3]।

२."**विभाषा पूर्वाह्णापरह्णाभ्याम**[4]" इति सूत्रे भाष्ये उद्योतग्रन्थे[5] प्रष्ठौहः इति प्रतीकमुपादाय वहश्च इति ण्विः। एतत् भाष्यप्रमाण्यात् तत्र छन्दसी इति नानुवर्तते, ण्यन्तात् विचि इति ण्विः। एतत् स्थानिवत्वात् ऊठ् दुर्लभः इत्युक्तम्।

३.एवञ्च विचोऽनभिधानं चिन्त्यम् इति हरिशास्त्रिणां कथनं न सम्यक्। प्रागुक्तरीत्या तत्र ऊठः अप्रवृत्त्या फलभेदस्य वक्तुमशक्यत्वात् अनभिधानकथनस्यानावश्यक्तत्वात् इति।

४.४.६. कार्यकालपक्षे अस्याः परिभाषायाः प्रवृत्तिरनिवार्या शङ्का मतान्तरनिराकरणपूर्वकं तदुत्तरं च

असिद्धं बहिरङ्गमन्तरङ्गे[6] इति परिभाषा त्रिपाद्यां न प्रवर्तते। "**पूर्वत्रासिद्धम्**[7]" इति सूत्रेण त्रिपाद्याः असिद्धत्वात्। अस्याश्च परिभाषायाः "**वाह ऊठ्**[8]" इति सूत्रस्थं ऊठ् ग्रहणं ज्ञापकमिति हेतोः एषा सपादसप्ताध्यायीस्था। अतः परिभाषेयं त्रिपाद्यां न प्रवर्तते इति सिद्धान्तितम्।

अत्र प्रश्नः

---

1 वै.सि.कौ(तत्त्वबोधिनीसहिता), पृ -७९

2 अष्टा. ६-१-१०८

3 ल.श.शे(प्र.भा), पृ -४०३

4 अष्टा. ४-३-२४

5 व्या.म.भा(च.भा), पृ -२०३

6 परिभाषेन्दुशेखरः,परि.सं -५०,पृ -२३७

7 अष्टा. ८-२-१

8 अष्टा. ६-४-१३२

यथोद्देशपक्षे सापादिकबहिरङ्गपरिभाषादृष्ट्या त्रैपादिकान्तरङ्गस्या-सिद्धत्वात् स्वदृष्ट्या स्वोपस्थापकलिङ्गाभावेन परिभाषेयं त्रिपाद्यां मा प्रवर्ततां नाम। किन्तु कार्यकालपक्षेऽस्याःप्रवृत्तिर्दुर्वारैव। तत्पक्षेऽपि व्यवहर्तृदृष्टान्तेन परिभाषाणां स्वदेशीयत्वस्य प्रतिपादितत्वेन परिभाषादृष्ट्या त्रिपाद्याः असिद्धत्वेऽपि त्रैपादिकान्तरङ्गदृष्ट्या सापादिकपरिभाषायाः सिद्धतया "**तस्मिन्निति निर्दिष्टे पूर्वस्य**[1]" इति सूत्रं परिभाषाणामिव तदाकाङ्क्षया त्रिपाद्यां तत्प्रवृत्तेः सुवचत्वात्। अत एव "**पूर्वत्रासिद्धम्**[2]" इति सूत्रे भाष्ये[3] सपादसप्ताध्ययीस्थपरिभाषाणां त्रिपाद्यामप्रवृत्तिमाशङ्क्य यद्यपीदं तत्रासिद्धं तत्विह सिद्धम्।। कथं? कार्यकालं संज्ञापरिभाषम्। यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम् इति समाहितम्। एवं च यथोद्देशपक्षे त्रिपाद्यामस्याप्रवृत्तावपि कार्यकालपक्षे एतत्प्रवृत्तिः दुर्वारिव इति।

अत्रोत्तरम्

सापादिकबहिरङ्गं प्रति त्रैपादिकान्तरङ्गस्य "**पूर्वत्रासिद्धम्**[4]" इति सूत्रेण असिद्धत्वेन सापादिकबहिरङ्गशास्त्रदृष्ट्या त्रैपादिकान्तरङ्गस्याविद्यमानत्वेन पूर्वरूप सापादिकबहिरङ्गस्य तादृशान्तरङ्गनिरूपितबहिरङ्गाभावात् त्रिपाद्याम् उपस्थिततया अनया परिभाषया सापादिकबहिरङ्गस्य असिद्धत्वप्रतिपादनं न युज्यत एव। अतः यथोद्देशपक्षे इव कार्यकालेऽपि त्रिपाद्यां परिभाषेयं न प्रवर्तते एव इति।

अत्र वाक्यर्थचन्द्रिकाकृतः[5]

मूले पूर्वं प्रति परस्यासिद्धत्वात् इति वाक्ये पूर्वं प्रति इत्यस्य सापादिकबहिरङ्गपरिभाषाशास्त्रं प्रति इत्येवमर्थमभिप्रयन्ति ते। शास्त्रे चेतनत्वारोपश्च बहुशोदृष्टत्वादिह परिभाषायां तदारोपात्तया ज्ञायमानमेवान्तरङ्गपरिभाषोपस्थितौ तद्बोध्यान्तरङ्गशास्त्रीयप्रवृत्तिनिवृत्य-न्तरप्रयोजकस्य बहिरङ्गासिद्धत्वस्य वा नियामकम्। न तु वस्तुभूतम्। अन्यथा

---

1 अष्टा. १-१-६

2 अष्टा. ८-२-१

3 व्या.म.भा(ष.भा), पृ -७६

4 अष्टा. ८-२-१

5प.शे(वाक्यार्थचन्द्रिकासहितः), पृ -२७०

भाधिकारीयेष्वप्यन्तरङ्गेषु परिभाषाप्रवृत्तावसिद्धवत्सूत्रस्थभाष्यविरोधापत्तेः। ततश्च कार्यकालेऽपि परिभाषाणां विधिदेशीयत्वानभ्युपगमात् त्रैपादिकसिद्धत्वेनान्तरङ्गत्वेनाभिमतस्य विधिमनतया तदपेक्षया बहिरङ्गत्वेनाभिमते सापादिके बहिरङ्गत्वस्य ज्ञातुमशक्यत्वात्तन्निरूपितमन्तरङ्गत्वमपि दुर्ज्ञेयमेव। निरूपितबुद्धेर्निरूपकबुद्ध्यधीनत्वात् इति वदन्ति।

अत्र नागेशगूढार्थदीपिकाकाराः[1]

वाक्यर्थचन्द्रिकाकाराणां व्याख्यानामयुक्तम्। तथा हि मूले प्रथमद्वितीयपूर्वशब्दाभ्यामेकस्यैव ग्रहणस्य स्वारसिकतया प्रथमपूर्वशब्देन परिभाषाशास्त्रस्य द्वितीयपूर्वशब्देन बहिरङ्गशास्त्रस्य च ग्रहणं सर्वथा ग्रन्थस्वारस्यविरुद्धम्। द्वितीयपूर्वशब्देनापि परिभाषाशास्त्रस्य ग्रहणं तु न युक्तम्। तन्निरूपितबहिरङ्गत्वाभावादिति तदुत्तरग्रन्थस्यालग्नकत्वात्। किं च नम्न अनया पूर्वस्यासिद्धत्वादिति तदुत्तरशङ्काग्रन्थे पूर्वपदेन सापादिकबहिरङ्गशास्त्रस्यैव ग्रहणीयतया अत्रत्यपूर्वशब्देन परिभाषाशास्त्रस्य ग्रहणेऽनयोर्ग्रन्थयोः परस्परमसंबद्धत्वापत्तिः। किञ्चास्य ग्रन्थस्य परिभाषादृष्ट्या त्रैपादिकान्तरङ्गस्यासिद्धत्वप्रतिपादनपरत्वे तदर्थस्य इयं त्रिपाद्यां न प्रवर्तते असिद्धत्वात् इत्यादिना प्रागुक्तत्वेन पौनरुक्त्यापत्तेः। एवञ्च वाक्यार्थचन्द्रिकाकाराणां व्याख्यानरीतिः न युक्तेति तेषामाशयः।

अत्र समीक्षा

अत्र व्याख्यातृणामाशयं किञ्चिदिव प्रस्तौमि। पूर्वं सामान्यतः सापादिकपरिभाषादृष्ट्या त्रैपादिकान्तरङ्गस्यासिद्धत्वात्त्रिपाद्यां परिभाषाया अप्रवृत्तिं प्रतिपाद्य न च कार्यकालपक्ष इत्यादिना पुनरत्र शङ्काकरणेन तद्ग्रन्थस्य तत्पक्षे परिभाषादृष्ट्या असिद्धत्वेऽपि त्रिपादीस्थान्तरङ्गदृष्ट्या परिभाषायास्सिद्धतया परिभाषान्तराणामिवास्या अपि त्रिपाद्यां प्रवृत्तिर्दुर्वारित्याशयकतया समाधानग्रन्थे पूर्वशब्देन परिभाषायाः ग्रहणमनुचितम्।

---

1 प.शे(नागेशगूढार्थदीपिकासहितः),पृ -२५८ -२५९

तथा सति तादृशशङ्कया अनिस्तारात्। किञ्च कार्यकालपक्षे त्रिपाद्यां तदुपस्थितावपि पूर्वं प्रति परासिद्धत्वात् इति स्वरसन्धिप्रकरणस्थशेखरग्रन्थे[1] पूर्वपदेन सापादिकबहिरङ्गशास्त्रग्रहणस्यैव स्वारसिकतया तदनुरोधेनात्रापि तथैव ग्रहणमुचितम्। किञ्च **"खरवसानयोर्विसर्जनीयः[2]"** इति सूत्रस्थ उद्योतग्रन्थे[3] सापादिकबहिरङ्गशास्त्रदृष्ट्या त्रैपादिकान्तरङ्स्यासिद्धत्वात् त्रिपाद्यामस्या अप्रवृत्तिरित्यर्थस्य कण्ठत उक्तत्वेनात्रैतद्ग्रन्थस्य अन्यथा व्याख्यानं सर्वथा नागेशानभिमतमिति बोध्यम्। यद्यपि कैयटे न चात्रान्तरङ्गबहिरङ्गयोर्युगपत्समवधानमस्ति इति भाष्यव्याख्यावसरे अत्र विषयेऽन्तरङ्गबहिरङ्गयोर्युगपदेकस्यां बुद्धावपेक्षितपरस्परवस्थानं नास्ति पूर्वस्यां परिभाषायां परस्य विसर्जनीयस्यासिद्धत्वादन्तरङ्गाभावद्रेफस्य तदपेक्षबहिरङ्गत्वाभावाद्बहिरङ्गपरिभाषानुपस्थानात्प्राप्नोत्येव विसर्जनीय इत्युक्तम्। तेन परिभाषादृष्ट्या अन्तरङ्गस्यासिद्धत्वमित्यर्थः आपाततः प्रतीयते। तथापि पूर्वस्यामित्याद्यसिद्धत्वात् इत्यन्तग्रन्थमेकाभिप्रायेण व्याख्याय तदुत्तरग्रन्थं युक्त्यन्तरमाहअन्तरङ्गाभावाद्रेफस्येतीत्यवतीर्ये त्रैपादिकान्तरङ्गस्य सपादसप्ताध्ययीस्थरेफविधायकदृष्ट्या असिद्धत्वेनैतन्निरूपितबहिरङ्गत्वमेव तस्य नास्तीत्यर्थ इति तदाशयं विवृण्वता उद्योतग्रन्थेन असिद्धत्वादित्यान्तो ग्रन्थो यथोद्देशपक्षाभिप्रायकः, तदुत्तरग्रन्थः कार्यकालपक्षाभिप्रायक इति च स्पष्टमेव लभ्यत इति बोध्यम्।

४.४.७. उपसर्गाणां द्योतकत्वनिरूपणम्

उपसर्गाणां विषये, निपातानां विषये च वाचकत्वमित्यत्र च सन्ति मतभेदाः। नागेशसिद्धान्ते तु उपसर्गाणां सर्वथा द्योतकत्वमेव। निपातानां विषये तु पक्षद्वयमपि लभ्यते। तद्यथा उपसर्गाणां वाचकत्वे तदर्थसम्बन्धस्य तत्समबन्धं विना ज्ञातुमशक्यतया पूर्वं तत्सम्बन्ध आवश्यकः। तेषां तु न वाचकत्वम्। किं तु द्योतकत्वमेव। तच्च समभिव्याहृतधातुनिष्ठाविशिष्टार्थविषयकशक्त्यभिव्यञ्जकत्वम्।

---

1 ल.श.शे(प्र.भा), पृ -१४९,

2 अष्टा. ८-३-१५

3 व्या.म.भा(ष.भा), पृ -१५८

तथा च धातूनामनेकार्थत्वात्तेषामेवोपसर्गद्योत्यार्थविशिष्टे शक्तिरिति विशिष्टैव क्रिया साधनेन साध्यते। न तु साधनादवाप्तरूपा सामान्यतो विशेषं लभते। तदुक्तं **"सुट्कात्पूर्वः[1]"** इति सूत्रे भाष्ये[2] यस्त्वसौ धातूपसर्गयोरभिसम्बन्धस्तमभ्यन्तरीकृत्य धातुस्साधनेन युज्यते। अवश्यं चैतदेवं विज्ञेयम्। यो हि मन्यते पूर्वं धातुस्साधनेन युज्यते पश्चादुपर्गेणेति तस्य आस्यते गुरुणा इत्यकर्मकः, उपस्यते गुरुरिति केन सकर्मस्स्यात् इति। धातूपसर्गसभिव्याहाराधीनत्वेन योऽर्थस्तत्वाभिमतस्तं विशिष्टर्थं केवलो धातुरेव स्वार्थं कृत्वा तस्य साध्यत्वेन बोधाय साधनेन युज्यते। पश्चादुपसर्गसंज्ञकशब्देन। यस्तूपसर्गाणां वाचकत्वमभ्युपेत्य शब्दसम्बन्धवदर्थसम्बन्धोऽपि साधनसम्बधानन्तरमेवेति मन्यते तस्यास्यते उपास्यत इत्यनयोरुभयोरप्यकर्मकत्वात्कथमुक्तप्रयोगद्वयोपपत्तिरिति तदाशयः। एवञ्च धातोरुपसर्गसंज्ञकशब्देन पूर्वमसम्बन्धेऽपि तदर्थेन सह सम्बन्धस्य प्रागेव सत्त्वात्तं विशिष्टार्थमादाय धातोस्सकर्मकत्वात्कर्मणि लकारादिसिद्धिः। न च धातुनैव विशिष्टार्थप्रतीतौ उपसर्गाणां प्रयोग एव न स्यादिति वाच्यम्। श्रोतृबोधाय उपसर्गाणां प्रयोगात्। अन्यथा केवलात्ततोऽन्यत्राप्रतीयमानोऽर्थस्तैर्न बुध्येतेति भावः। तदुक्ते **"गतिर्गतौ[3]"** इति सूत्रे कैयटे[4] विशिष्टैव क्रियासाधनेनोह्यते। ततश्च प्रयोक्ता विशिष्टायाः क्रियायास्साधनेन सम्बन्धं प्रतिपादयितुं धातूपसर्गयोस्समुदायं प्रयुङ्क्ते इति। एवञ्च पूर्वं धातुरुपसर्गेणेति भाष्ये उपसर्गेणेत्यस्य तद्योत्यार्थेनेत्यर्थः। पश्चादुपसर्गेणेत्यत्र उपसर्गणेत्यस्य तत्संज्ञकशब्देनेत्यर्थ इति नानयोः पक्षयोर्विरोधः। एतेन तयोर्यथाश्रुतार्थपरत्वमभिप्रेत्य णेरध्ययने, प्रत्यय इत्यादिनिर्देशः क्वचित्साधनप्रयुक्तकार्यात्पूर्वम् उपसर्गानिमित्तककार्याप्रवृत्तिं ज्ञापयित्वा, पूर्व धातुस्सधनेनेत्यस्य तद्विषयत्वमपरस्य तदन्यविषयत्वमिति न विरोध इति दीक्षताद्युक्तमपास्तम्। उक्तरीत्या तयोरेकवाक्यतयैव निर्वाहे ज्ञापकत्वाद्याश्रयणस्यानौचित्यात्। ततश्च धातोः पूर्वमुपसर्गद्योत्यार्थेन सह सम्बन्धः।

---

1 अष्टा. ६-१-१३५

2 व्या.म.भा(प.भा), पृ -१३७

3 अष्टा. ८-१-७०

4 व्या.म.भा(च.भा), पृ -६९

ततो वाचकप्रत्ययसमभिव्याहाराधीनस्साधनसम्बन्धः। ततः उपसर्गसंज्ञकशब्देन सम्बन्ध इति क्रमात्तदनुरोधेन तत्प्रयुक्तकार्यणामन्तरङ्गबहिरङ्गभाव इति बोध्यम् इति।

अत्र सिद्धान्तः

उपसर्गाणां द्योतकत्वम्, निपातानां तु वाचकत्वमेवेति इति नैयायिकानां मतम्। उपसर्गाणामिव सर्वेषां निपातानामपि द्योतक्तवमेवेति दीक्षतादीनामाशयः।
उपसर्गाणां द्योतकत्वं, निपातानां विषये क्वचित् वाचकत्वं क्वचित् द्योतकत्वमिति नागेशसिद्धान्तः।

अत्र द्योतकत्वं नाम - समभिव्याहृतवृत्त्युद्बोधकत्वम्। उपसर्गाणां द्योतकत्वादेव **"भूवदायो धातवः[1]"** इति सूत्रे भाष्ये अनेकार्थत्वात् धातूनां विशिष्टोऽर्थो धातुरेव उपसर्गास्तु बोद्धारं प्रति तदर्थद्योतकः इत्युक्तं कैयटोपाध्ययैः। वक्ता धातोरेव विशिष्टमर्थं बुद्धौ कृत्वा साधनसम्बन्धकार्यप्रत्यययोगेन तत्र साध्यत्वागतौ श्रोतृबोधाय क्रियायोगनिमित्तोपसर्गसंज्ञकशब्दयोगं करोति। अन्यथा केवलधातुतः सर्वत्राप्रतीयमानतया श्रोतुः तद्बोधो न स्यात्। धातूपसर्गयोः सम्बन्धं बुद्धिविषयीकृत्य उपसर्गार्थकृतो विशेषः धातुरेव अभ्यन्तरीकृतः पदप्रयोगकाले उपसर्गसम्बन्धे सति श्रोतृणां प्रकाशते। अत एव प्रतिष्ठते इत्यादौ तिष्टतेः धातुत्वेन यज्यादिवत् अनेककार्यत्वात् धातोरेव गतिः अर्थः। प्रशब्दस्तु बोधक एव इत्येवं उपसर्गाणां द्योतकत्वं महता ग्रन्थेन लघुमाञ्जूषायां निपातर्थवाचारे निरुपितो वर्तते।

४.४.८. विशेषापेक्षात् समान्यापेक्षमन्तरङ्गम् इति नियमास्वीकारप्रतिपादनम्

अत्र भट्टोजिदीक्षिताः

विशेषापेक्षात् सामान्यापेक्षम् अन्तरङ्गं भवति, विशेषापक्षे विशेषधर्मस्याधिकस्य निमित्तत्वात्। यथा रुद्यात्। रुदिर् अश्रुविमोचने इति धातोः विधि लिङि प्रथमपुरुषैकवचने तिबादेशे **"इतश्च[2]"** इति इकारलोपे रुद्+ त् इत्यवस्थायां **"यासुट् परस्मैपदेषूदात्तो ङिच्च[3]"** इति सूत्रेण यासुडागमः **"रुदश्च पञ्चभ्यः[1]"** इति सूत्रेण ईट्

---

1 अष्टा. १-३-१

2 अष्टा. ३-४-१००

3 अष्टा. ३-४-१०३

आगमश्च प्राप्तः। तत्र प्रकृतिप्रत्यविशेषापेक्षया ईट् बहिरङ्गः। तेन सामान्यापेक्षत्वात् यासुडेव प्रवर्तते। यासुटः धात्वधिकारीयतया धातुसामान्यापेक्षत्वेन अन्तरङ्गत्वम्। ईटस्तु सार्वधातुकाक्षिप्तधातुत्वरूपसामान्य-धर्मावरुद्धरुधादित्वरूपविशेषधर्मसापोक्षत्वात् बहिरङ्गत्वम्। तथा च सामान्यापेक्षत्वात् यासुडेव प्रवर्तते। स्पष्टोऽयमाशयः सिद्धान्तकौमुद्याम्[2],लघुशब्दन्दुशेखरे[3] च।

अत्र नागेशोपाध्यायः

सामान्यापेक्षस्य शास्त्रस्यान्तङ्गत्वम्, विशेषापेक्षस्य शास्त्रस्य बहिरङ्गत्वमित्येतादृशरूपः अन्तरङ्गबहिरङ्गभावः नाश्रीयते एव। रुद्यात् इत्यत्र यासुडागमस्तु नित्यात्वात् प्रवर्तते, ईडागमस्तु न नित्यः। यासुटि कृते अपृक्तत्वाभावेन तस्य प्राप्तेरभावात्। "**पादः पत्**[4]" इति सूत्रे भाष्यकैयटयोरपि एतादृशः अन्तरङ्गबहिरङ्गभावः नाश्रयणीयः इति सूचितम् इत्यभिप्रयन्ति।

अत्र चन्द्रिकाकृतः[5]

विशेषापेक्षस्य बहिरङ्त्वं, समान्यापेक्षस्यान्तरङ्गत्वमिति सिद्धान्तस्याङ्गीकारे "**पादः पत्**[6]" इति सूत्रस्थभाष्यकैयटयोः प्रामाण्यं न भवितुमर्हति इत्याशयेन केचित्तु प्रतिपदविधित्वेन "**तदो सः सौ**[7]" इति सत्वं, त्यदाद्यतत्वस्य बाधकं स्यादिति साफल्यादानन्त्यग्रहणस्य न वैयर्थ्यमित्याहुः। "**पादः पत्**[8]" इति सूत्रे इति। तत्र हि निर्दिश्यमानपरिभाषाफलनिरूपणावसरे तामादीनामिटश्च रुदिताम् इत्यादौ प्रवृत्तविषये सम्प्रधारणायां परत्वादिटमाशङ्क्य अन्तरङ्गत्वं तामादीनामुक्तं भाष्ये। कैयटे च प्रग्लादेशेभ्यो धात्वाधिकारात् तामादीनामन्तरङ्गत्वमुक्तम्।

---

1 अष्टा. ७-३-९८

2 वै.सि.कौ(तत्त्वबोधिनीसहिता), पृ -३४२

3 ल.श.शे(द्वि.भा), पृ -५७२

4 अष्टा. ६-४-१३०

5प.शे(वाक्यार्थचन्द्रिकासहितः),पृ -२९४

6 अष्टा. ६-४-१३०

7 अष्टा. ७-२-१०६

8 अष्टा. ६-४-१३०

एवंविधान्तरङ्गबहिरङ्गभावसत्त्वे तु तेषां विशेषापेक्षत्वेन बहिरङ्गत्वादन्तरङ्गत्वप्रतिपादनमसङ्गतमेव स्यादित्याशयः।

केचित्तु प्रतिपदोक्तत्वेनैव तामादीनामन्तरङ्गत्वमिति भाष्यशयः, कैयटश्च प्रग्लादेशेभ्यो धात्वाधिकारात् इत्यनैमित्तकत्वेनान्तरङ्गत्वमभिप्रैतीत्ययुक्तमेव। आतृतीयसमाप्तेर्धात्वधिकारेऽपि यासुड्विधघटकस्य परस्मैपदेष्वित्यस्य विषयसप्तम्यन्ततया लावस्थायामेव यासुटि, तद्व्यवधाने क्रियास्तामित्यादौ तामादीनां प्रवृत्तये "**धातोः**[1]" इत्यस्य विहितपञ्चम्यन्ततयापरनिमित्तकत्वाभावस्य सुवचत्वात्। तस्मादुपदर्शितान्तरङ्गाभावनिराकरणेनानयोर्भाष्यकैयटयोः प्रमाण्यसम्भव इत्याहुः इति वदन्ति।

अत्र नागेश गूढार्थदीपिकाकाराः[2]

सामान्यापेक्षस्यान्तरङ्गत्वम्, विशेषापेक्षस्य बहिरङ्गत्वमित्यंशः यथा न भाष्यकैयटसम्मतः तथा नागेशगूढार्थदीपिकाकाराः सूचित इति इति प्रातीकमादाय सुष्ठु न्यरूपयन् तद्यथा तत्रहि निर्दिश्यमानपरिभाषाप्रयोजनकथनावसरे अरदितामित्यादविट्तामाद्योस्संप्रधारणायां परत्वादिटमाशङ्कयान्तरङ्गत्वात्तामादाय इत्युक्तम्। कैयटेन च प्रग्लादेशेभ्यो धात्वधिकारात्तेषाम् अन्तरङ्गत्वमुपपादितम्। समान्यविशेषोभयानपेक्षत्वेऽपि कैयटोक्तदिशा केवलविशेषापेक्षत्वेनैव बहिरङ्गत्वाङ्गीकारेतु तामादीनं तसादिरूपविशेषापेक्षत्वेन तादृशबहिरङ्गत्स्यैव सत्त्वादन्तरङ्गस्तामादय इति भाष्योक्तिरनुपपन्नैव स्यात्। तथा प्रग्लादेशेभ्यो धात्वधिकार इत्यङ्गीकारेऽपि तामादीनामन्तरङ्गताया वक्तुमशक्यतया कैयटोक्तिरप्यनुपपन्नैव स्यादतस्ताभ्यां तदभाव एव सूचयति इत्याशयः इति।

अत्र समीक्षा

"**पादः पत्**[3]" इति सूत्रे भाष्ये[1] प्रसङ्गतः **निर्दिश्यमानस्यादेशाः भवन्ति**[2]। इति परिभाषायाः पञ्च प्रयोजनानि कथितानि। तेष्वन्यतमं यथा प्रयोजनं सुप्तिङादेशे इति।

---

1 अष्टा. ६-१-६२

2 प.शे(नागेशगूढार्थदीपिकासहितः),पृ -२७३

3 अष्टा. ६-४-१३०

तत्र तिङः उदाहरणत्वेन अरुदिताम्, अरुदितम्, अरुदित इति त्रीणि उदाहरणानि दत्तानि। अत्र सर्वत्र "**रुदादिभ्यः सार्वधातुके**[3]" इति सूत्रेण इडागमः "**तस्थस्थमिपां तान्तांतामः**[4]" इति सूत्रेण तामादयश्च प्राप्ताः। तत्र परमिडागमं बाधित्वा अन्तरङ्गत्वात् तामादयः भवन्तीति भगवता भाष्यकृता निरूपितम्। प्रग्लादेशेभ्यो धात्वाधिकारात् तामादयोऽन्तरङ्गाः इति कैयटः जगाद[5]। विशेषपैक्षस्य बहिरङ्गत्वे कैयटग्रन्थस्य विरोधापत्तिः। अनेन विशेषापेक्षात् सामान्यापेक्षमन्तरङ्गम् इति न प्रतिपादयितुं शक्यमिति स्पष्टमेव लभ्यते।

४.४.९. बहिरङ्गे समानाश्रयत्वमाभीयत्वमिति विशेषणद्वये मतभेदविचारः

अत्राक्षेपः

अन्तरङ्गपरिभाषायाः अभ्युपगमे पपुषः पश्य इत्यादौ पा धातोः लिटि "**क्वसुश्च**[6]" इति क्वसु आदेशे अनुबन्धलोपे, द्वित्वे,अभ्यासकार्यी

पपा+वस् इति स्थिते ततः शसि "**आर्धधातुकस्येड्वलादेः**[7]" इति सूत्रेण प्राप्तामिडागमं बाधित्वा, नित्यत्वात्, प्रतिपदविधित्वेन अन्तरङ्गत्वात् वा,तं बाधित्वा "**वसोः सम्प्रसारणम्**[8]" इति वकारस्य स्थाने सम्प्रसारणे कृतेऽपि "**आतो लोप इटि च**[9]" इति सूत्रदृष्ट्या बहिरङ्गस्य सम्प्रसारणस्य असिद्धत्वात् आकारलोपः न स्यात् इति।

अत्रोत्तरम्

भाधिकारपठितेऽन्तरङ्गे आकारलोपे कर्तव्ये भाधिकारपठितस्य बहिरङ्गस्यासिद्धत्वं नेति हेतोः आकारलोपः प्रवर्तते एव इति। अयमाशयः अन्तरङ्गपरिभाषा "**वाह ऊठ्**[10]" इति सूत्रे ऊठ् ग्रहणेन ज्ञापिता। तच्च सूत्रं

1परिभाषेन्दुशेखरः,परि.सं -१२,पृ -८०

2 व्या.मा.भा(पं.भा), पृ -३४९

3 अष्टा. ७-२-७६

4 अष्टा. ३-४-१०१

5 व्या.म.भा(प.भा) पृ -३४९

6 अष्टा. ३-२-१०७

7 अष्टा. ७-२-३५

8 अष्टा. ६-४-१३१

9 अष्टा. ६- ४-६४

10 अष्टा. ६-४-१३२

भाधिकारस्थम्। अतः आभीयान्तरङ्गस्य तदृष्ट्या त्रिपाद्याः इव "**असिद्धवदत्राभात्**[1]" इत्यनेन सिद्धत्वात् परिभाषा न प्रवर्तते। परिभाषायाः स्वोपस्थापकसामानाश्रयत्वेन अन्तरङ्गशास्त्राश्रये एव परिभाषाया अपि आश्रय इति सामानाश्रयत्वमिपि अव्याहतम्। किञ्च परिभाषायाः "**वाह ऊठ्**[2]" इति सूत्रस्थतया तत्सामानाश्रयत्वस्यापि सत्वेन पपुषः इत्यादौ बहिरङ्गसम्प्रसारणसामानाश्रयत्वात् अन्तरङ्गबहिरङ्गदृष्ट्या परिभाषायाः, परिभाषादृष्ट्या तयोश्च "**असिद्धवदत्राभात्**[3]" इत्यनेन असिद्धत्वात् न तत्र तस्याः परिभाषायाः प्रवृत्तिः। स्पष्टमिदम् "**असिद्धवदत्राभात्**[4]" इति सूत्रे उद्योते[5] इति।

अत्र विजयाकृतः[6]

एवं स्थिते बहिरङ्गस्य आभीयत्वविशेषणं च व्यर्थमित्याशयेन मूले बहिरङ्गे सामानाश्रयत्वमाभीयत्वमिति विशेषषणमनुवयुक्तमेवेति विभावयन्तु इत्येवं व्याख्यातं श्री जयदेवशर्ममिश्र महाभागैः।

अत्र नागेशगूढार्थदीपिकाकाराः[7]

नागेशगूढार्थदीपिकाकारास्तु विजयाकृदुक्तं नानुमन्यन्ते। समानाश्रयस्य इत्यस्य बहिरङ्गविशेषणत्वाभावात्। आभीयत्वस्वैव विशेषणं तत्। "**असिद्धवदत्राभात्**[8]" इति सूत्रस्थ प्रत्याख्यानपक्षे तु परिभाषायाः अनित्यत्वेन अप्रवृत्तिः वक्तव्या। एवञ्च विजयाकृदुक्तं न युक्तमिति तेषामाशयः।

अत्र समीक्षा

नागेशगूढार्थदीपिकाकाराणां मतमेव अत्र युज्यत इति भाति। तथा हि "**असिद्धवदत्राभात्**[9]" इति सूत्रे भाष्ये वसुसम्प्रसारणमज्विधौ सिद्धं वक्तव्यम्।किं

---

1 अष्टा. ६-४-२२

2 अष्टा. ६-४-१३२

3 अष्टा. ६-४-२२

4 अष्टा. ६-४-२२

5 व्या.म.भा(प.भा), पृ -२९२ -२९३

6प.शे(विजयासहितः), पृ -२१३

7 प.शे(नागेशगूढार्थदीपिकासहितः),पृ -२८२

8 अष्टा. ६-४-२२

9 अष्टा. ६-४-२२

प्रयोजनम् पपुषः पश्य, तस्थुषःपश्य वसोः सम्प्रसारणे कृते अचित्याकारलोपादीनि यथा स्युः। किं पुनः कारणं न सिद्ध्यन्ति? बहिरङ्गलक्षणत्वादसिद्धत्वाच्च इत्युक्त्वा समानाश्रयवचनात्सिद्धम्। सामानाश्रयसिद्धं भवति। व्याश्रयं चैतत्। वसावाकारलोपादीनि, वस्वन्तस्य विभक्तौ सम्प्रसारणमित्यनेनासिद्धत्वात् इति द्वितीयहेतुं खण्डयित्वा ततः तत्र भवेदसिद्धत्वं प्रयुक्तं बहिरङ्गलक्षणं तु नैव प्रयुक्तम् इत्याशङ्क्य नैष दोषः बहिरङ्गमन्तरङ्गमिति च प्रतिद्वन्दिभाविनावेतावर्थौ। सत्यन्तरङ्गे बहिरङ्गे, सति च बहिरङ्गे अन्तरङ्गम्। न चात्र अन्तरङ्गबहिरङ्गयोः युगपत् समवस्थानमस्ति इत्युक्तम्[1]। अनेन च भाष्येण प्रागुक्तस्य अर्थस्य लाभात् विजयाकृदुक्तं न युज्यत इति मे भाति।

४.५. नाजानान्तर्ये बहिष्ट्वप्रक्लुप्तिः

अत्र अच् पदे विग्रहविषये मतभेदनिरूपणम्

'अक्षैः' दीव्यति इत्यर्थे अक्षेति करणोपपदपूर्वकात् 'दिव्' धातोः 'क्विप्' प्रत्यये, तस्य सर्वस्य लोपे "**च्छ्वोः शूडनासिके च**[2]" इति वकारस्य स्थाने सम्प्रसारणे ऊठि, ठकारस्यानुबन्धलोपे "**इको यणचि**[3]" इति इकारस्य यकारे, अक्षद्यू इति जाते, विशिष्टात् सुप् प्रत्यये रुत्वे विसर्गे च अक्षद्यूः इत्यभीष्टं रूपम्।

अत्र प्रश्नः

अक्ष दि+ऊ इत्यवस्थायामन्तरङ्गे यणादेशे कर्तव्ये बहिरङ्गस्य ऊठः असिद्धत्वात्(असिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषया) कथं वा यणादेशः प्रवर्तते? इति।

अत्रोत्तरम्

नाजानान्तर्ये बहिष्ट्वप्रक्लुप्तिः[4]। अचः अन्यानन्तर्यनिमित्तके अन्तरङ्गे कार्ये कर्तव्ये जातस्य बहिरङ्गस्य असिद्धत्वं न इति परिभाषार्थः। एवञ्च अचः= इकारस्य,

---

1व्या.म.भा(पं.भा),पृ -२९२,२९३

2 अष्टा. ६-४-१९

3 अष्टा. ६-१-७७

4परिभाषेन्दुशेखरः,परि.सं -५१,पृ -२८४

अन्यानन्तर्यनिमित्तके = ऊकारनिमित्तके, अन्तरङ्गे कार्ये कर्तव्ये= "**इकोयणचि**[1]" इति यणादेश कर्तव्ये, जातस्य बहिरङ्गस्य = "**च्छवोः शूडनासिके च**[2]" इति सूत्रेण वकारस्य स्थाने जातस्य ऊठः न असिद्धत्वमिति अक्षद्यूरित्यत्र नास्ति कश्चिद्दोषः। एवञ्च **असिद्धं बहिरङ्गमन्तरङ्गे**[3] इति परिभाषायाः अपवादः इयं परिभाषा इति।

अत्र प्राचीनाः[4]

"**विप्रतिषेधे परं कार्यम्**[5]" इति सूत्रे भाष्ये अचोरानन्तर्यमाश्रित्य यत्र कार्यं विधीयते, तत्रैषा परिभाषा नोपतिष्ठते इति कैयटग्रन्थे अचोः इति द्विवचनान्तसत्वेन परिभाषयाम् अजानन्तर्ये इत्यत्र अचोः आनन्तर्यम् इति द्विवचनान्तेन समासः। पूर्वपरिभाषातः अन्तरङ्गे इति पदमत्र संबध्यते। तथा च यत्रान्तरङ्गे अचोः आनन्तर्यमाश्रितं तत्र बहिरङ्गपरिभाषा नोपतिष्ठते इत्यस्याः परिभाषायाः अर्थः इत्यभिप्रयन्ति।

अत्र नागेशगूढार्थदीपिकाकाराः[6]

प्राचीनोक्तं न युक्तम्। तद्रीत्या तुगागमस्य अजद्वयानन्तर्यनिमित्तकत्वाभावेन ज्ञापनोत्तरमपि तुग्ग्रहणस्य स्वांशे चारितार्थ्याभावात् तस्य प्रकृतपरिभाषाज्ञापकत्वप्रतिपादनपरं "**विप्रतिषेधे परं कार्यम**[7]" इति सूत्रस्थ भाष्यासङ्गत्यापत्तिः। अतः प्रागुक्तकैयटग्रन्थे द्वित्वमविक्षितम्। अतः अचः इति एकवचनान्तेनैव विग्रहो न्यायः इति।

अत्र समीक्षा

"**विप्रतिषेधे परं कार्यम**[8]" इति सूत्रे भाष्ये कैयटग्रन्थे[9] अचोः इति द्विवचनान्तत्वेन विग्रह प्रदर्शितः इति प्रतिपादितम्। अत्र विज्ञप्तिः। न केवलं

---

1 अष्टा. ६-१-७७

2 अष्टा. ६-४-१९

3 परिभाषेन्दुशेखरः,परि.सं -५०,पृ -२३७

4 प.शे(नागेशगूढार्थदीपिकासहितः), पृ -२८७.

5 अष्टा. १-४-२

6 प.शे(नागेशगूढार्थदीपिकासहितः), पृ -२८७.

7 अष्टा. १-४-२

8 अष्टा. १-४-२

9 व्या.म.भा(द्वि.भा), पृ -२१४

"विप्रतिषेधे परं कार्यम[1]" इति सूत्रभाष्यस्थकैयटग्रन्थे एव अचो इति द्विवचनान्तं श्रूयते, अपि तु अन्यत्रापि तथा हि **"न धातुलोप आर्धधातुके[2]"** इति सूत्रे भाष्ये यत्र कार्यविधावानन्तर्येण अचोराश्रयणं तत्र निषेधादनुपस्थानं परिभाषायाः।यथा अक्षद्यूः इति कैयटग्रन्थे[3] एतज्ज्ञापयति अचोरानन्तर्ये बहिरङ्गस्यापि नासिद्धत्वं भवति इति च **"षत्वतुकोरसिद्धिः[4]"** इति सूत्रभाष्ये च कैयटग्रन्थे[5] च अचोः इति द्विवचनान्तत्वं संल्लक्ष्यते। किन्तु नागेशगूढार्थदीपिकाकारोक्तरीत्या[6] तत्र द्वित्वस्य अविवक्षितत्वमेव युज्यते। अत एव मूलग्रन्थे परिभाषार्थस्त्वचोऽन्यान्तर्यनिमित्तकेऽन्तरङ्गे कर्तव्ये जातस्य बहिरङ्गस्य बहिष्ट्वप्रक्लृप्तिर्न इति पङ्क्तिः सङ्गच्छते। एवञ्च परिभाषायाम् अचः अनन्तर्यम् अजानन्तर्यमित्येववचनान्तेन समासः। अत एव **"विप्रतिषेधे परं कार्यम[7]"** इति सूत्रे भाष्ये उद्योतग्रन्थे[8] द्वित्वमविवक्षितं तेन वक्ष्यमाणेन षत्वतुग्ग्रहणरूपेण ज्ञापकेन कर्तव्ये जातस्य बहिरङ्गस्यासिद्धत्वं नेति तदर्थः इत्येवं वदता नागेशोपध्यायेन स्पष्टमेव अचोः इत्यत्र द्वित्वस्य अविवक्षितत्वं प्रतिपादितम्।

४.५.१. प्रकृतपरिभाषाङ्गीकारे ह्रस्वस्य पिति कृति तुक् इति सूत्रस्थभाष्यविरोधशङ्का तत्परिहारश्च

अत्र प्रश्नः

प्रकृतपरिभाषायाः अङ्गीकारे **"ह्रस्वस्य पिति तुक्[9]"** इति सूत्रस्थभाष्यविरोधः। तत्र हि ग्रामणिपुत्रः इत्यत्र **"इको ह्रस्वोऽङ्यो गालवस्य[10]"** इति सूत्रेण ईकारस्य ह्रस्वे

---

1 अष्टा. १-४-२

2 अष्टा. १-१४

3 व्या.म.भा(प्र.भा), पृ -२०२.

4 अष्टा. ६-१-८६

5 व्या.म.भा(पं.भा), पृ -९५.

6प.शे(नागेशगूढार्थदीपिकासहितः),पृ -२८७

7 अष्टा. १-४-२

8 व्या.म.भा(द्वि.भा), पृ -२१४

9 अष्टा. ६-१-७१

10 अष्टा. ६-३-६१

"**ह्रस्वस्य पिति तुक्**[1]" इति तुगागामशङ्क्य ह्रस्वस्य बहिरङ्गासिद्धत्वेन समाहितम्। अस्याः परिभाषायाः सत्वे तु अचः=ह्रस्वस्य, अन्यानन्तर्यनिमित्तके=क्विन्निमित्तकेऽन्तरङ्गे कार्ये=तुगागामरूपकार्ये बहिरङ्गस्य= ह्रस्वस्यासिद्धत्वाभावेन तुगागमः दुर्वार एव इति।

अत्रोत्तरम्

"**इको ह्रस्वोऽङ्यो गालवस्य**[2]" इति सूत्रभाष्येण[3] अस्याः परिभाषायाः अनावश्यकत्मेव बोध्यते। वस्तुतस्तु अनेन ज्ञापकेनान्तरङ्गपरिभाषायाः अनित्यत्वमेव ज्ञाप्यते। अत एव नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः इति परिभाषा "**विप्रतिषेधे परं कार्यम्**[4]" इति सूत्रातिरिक्तस्थले न क्वापि दृश्यते। अतः अन्तरङ्गपरिभाषायाः अभ्युपगमं यत्र दोषाः प्राप्नुवन्ति ते सर्वेऽपि परिभाषायाः अनित्यत्वेन वारणीयाः। अयमंशः "**सम्प्रसारणाच्च**[5]" इति सूत्रे भाष्ये ध्वनितः[6]।

अत्र केचित्

"**सम्प्रसारणाच्च**[7]" इति सूत्रे भाष्ये यथा प्रागुक्तः विषयः ध्वनितः तं प्रकारं केचन व्याख्यातारः सुष्ठु एवं वर्णयामासः। तद्यथा तत्र दोषशब्दस्य बहुवचनान्तत्वेन प्रतिविधेयमित्यस्यैकवचनान्तत्वेन च बहुनां दोषाणां परिभाषाऽनित्यत्वरूपमेकमेव प्रतिविधानमिति भाष्यकाराशयः प्रतीयते। यद्येनां परिभाषां तत्सूत्रोक्तान्यन्यानि च प्रतिविधानानि भाष्यकारोऽभिप्रैष्यत्तदा दोषेषु प्रतिविधानान्यप्युक्तानीत्येवावक्ष्यत्। तथा अनुक्त्या चैकमेवानित्यैत्वरूपं प्रतिविधानं सर्वेषामिति तदाशयः। अन्तरङ्गानपीत्यादयोऽपि तदपवादभूता अनावश्यकता एव। तत्फलनामपि परिभाषाऽनित्यवेनैव सिद्धेः। निखिलापि तज्ज्ञापकसामग्री अन्तरङ्गपरिभाषाऽनित्यत्व एव प्रमाणम्। अनावश्यकत्वेऽपि तेषामुल्लेखः

---

1 अष्टा. ६-१-७१

2 अष्टा. ६-३-६१

3 व्या.म.भा(पं.भा),पृ -२४७,२४८

4 अष्टा. १-४-२

5 अष्टा. ६-१-१०८

6 व्या.म.भा(पं.भा), पृ -१२०

7 अष्टा. ६-१-१०८

परिभाषाया अप्रवृत्तिविषयपरिज्ञानार्थः। अक्षद्यूरित्यादौ यलोपवारणमपि परिभाषाऽनित्यत्वेनैवोपपद्यते।

अत्र समीक्षा

"**ह्रस्वस्य पिति तुक्**[1]" इति सूत्रे भाष्ये इह तर्हि ग्रामणिपुत्रः सेनानिपुत्र इति कृते तुक् प्राप्नोति इत्याशङ्कायां ग्रामणि पुत्रादिषु चाप्राप्तिः ग्रामणिपुत्रादिषु चाप्राप्तिर्भवति किं कारणम्। बहिरङ्गलक्षणादेव। अथवा परादिः करिष्यते। इति समाहितम्। अत्र तुगन्तरङ्गः, ह्रस्वो बहिरङ्गः इति कैयटग्रन्थः[2]। नाजानन्तर्य इति न्यायस्तु नास्त्येवेति भावः इत्याह उद्योतकारः। "**विप्रतिषेधे परं कार्यम्**[3]" इति सूत्रे भाष्ये[4] अन्तरङ्गपरिभाषायाः अनित्यत्वमाश्रित्य प्रकृतपरिभाषायाःअनावश्यकत्वं सूचितम्। तत्र हि भाष्ये, आङि पररूपवचनस्यान्तरङ्गबलीयस्त्वे ज्ञापकत्वं प्रतिपाद्य, विप्रतिषेधसूत्रसाध्यानि बहूनि प्रयोजनानि तस्य प्रतिपाद्य नैतानि सन्ति प्रयोजनानि विप्रतिषेधेनाप्येतानि सिद्धानीत्युक्तवा, वृक्षा अत्रेत्यादि तदसाध्यमेकं फले प्रदर्शितम्। वृक्ष+अस्+अत्रेत्यवस्थायां रूत्वे, पूर्वसवर्णदीर्घस्य "**अतो रोरप्लुतादप्लुते**[5]" इति उत्वस्य च प्राप्तावन्तरङ्गत्वादीर्घस्य प्रवृत्तिस्तत्फलमिति तदाशयः। पदसंस्काराश्रयणे तस्याप्यन्यथासिद्धिरित्याशयेन नचावश्यमिदमेव प्रयोजनम्, आद्ये योगे बहूनि प्रयोजनानि सन्ति, तदर्थमेषा परिभाषा कर्तव्या, प्रतिविधेयं दोषेषु इत्युक्तम्।

४.६. अन्तरङ्गानपि विधीन्बहिरङ्गो लग्बाधते

अत्र 'अपि' शब्दग्रहणे मतभेदनिरूपणम्

असिद्धं बहिरङ्गमन्तरङ्गे[6] इति परिभाषाया बहिरङ्गशास्त्रापेक्षया अन्तरङ्गशास्त्रस्य प्राबल्यमुक्तम्। उदा - विश्वौहः। अस्याः परिभाषायाः अङ्गीकारे गोमत्प्रियः इत्यादौ दोषापत्तिः। तथा हि गोमान् प्रियः यस्य सः इत्यर्थे गोमत्+सु प्रिय सु इति दशायां बहुव्रिहिसमासे प्रथमस्य सुप्रत्ययस्य "**हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं**

---

1 अष्टा. ६-१-७१

2 व्या.म.भा(पं.भा), पृ -७३

3 अष्टा. १-४-२

4 व्या.म.भा(द्वि.भा), पृ -२०४ -२१३

5 अष्टा. ६-१-११३

6 परिभाषेन्दुशेखरः,परि.सं.५०,पृ -२३७

हल्[1]" इति सूत्रेण लोपः "**सुपो धातुप्रातिपदिकयोः**[2]" इति सूत्रेण लुक् च प्राप्तः। तत्र पदद्वयनिमित्तकत्वेन लुक् बहिरङ्गः। समासघटकहलन्तशब्दनिमित्तकत्वेन लोपः अन्तरङ्गः।प्रगुक्तरीत्या **असिद्धं बहिरङ्गमन्तरङ्गे** इति परिभाषामाश्रित्य अन्तरङ्गत्वात् प्रत्ययस्य लोपे "**प्रत्ययलोपे प्रत्ययलक्षणम्**[3]" इति सूत्रेण प्रत्ययलक्षणेन "**उगिदचां सर्वनामस्थानेऽधातोः**[4]" इति नुमागमः "**अत्वसन्तस्य चाधातोः**[5]" इति सूत्रेण उपधायाः दीर्घश्च स्यात्। तथा च गोमत्प्रियः इत्यभीष्टं रूपं सिद्ध्येदिति शङ्कायां तद्वारणाय परिभाषेयमारब्धा **अन्तरङ्गानपि विधीन्बहिरङ्गोलुग्बाधते**[6] इति।अन्तरङ्गशास्त्रापेक्षया बहिरङ्गोऽपि लुगेव प्रवर्तते इति परिभाषार्थः। एवञ्चात्र अन्तरङ्गमपि लोपं बाधित्वा बहिरङ्गस्य लुकः एव प्रवृत्त्या न पूर्वोक्तदोषः।

अस्याश्च परिभाषायाः "**प्रत्ययोत्तरपदयोश्च**[7]" इति सूत्रं ज्ञापकम्। तथा हि मपर्यन्तयोः एकार्थयोः त्वमौ स्तः प्रत्ययः उत्तरपदे च इति सूत्रार्थः। उदा त्वत्कृतम्। त्वया कृतमित्यर्थे युष्मद्+टा कृत+सु इति स्थिते, "**कर्तृकरणे कृता बहुलम्**[8]" इति सूत्रेण तृतीयातत्पुरुषसमासे, प्रातिपदिकसंज्ञायां सुपः लुकि "**प्रत्ययोत्तरपादयोश्च**[9]" इति सूत्रेण युष्मद् शब्दे मपर्यन्तस्य त्व आदेशे "**खरि च**[10]" इति सूत्रेण दकारस्य चर्त्वे तकारे, त्वकृत इति जाते, विशिष्टात् सौ,अमादेशे,पूर्वरूपे च त्वकृतम् इति रूपम्। वस्तुतस्तु अत्र त्व अदेशसिद्ध्यर्थं सौ, "**प्रत्ययोत्तरपदयोश्च**[11]" इति सूत्रमनावश्यकमेव। तथा हि युष्मद्+टा कृत+सु इत्यवस्थायां, लुगपेक्षया अन्तरङ्गत्वात्

---

1 अष्टा. ६-१-६८

2 अष्टा. २-४-७१

3 अष्टा. १-१६२

4 अष्टा. ७-१-७०

5 अष्टा. ६-४-१४

6 परिभाषेन्दुशेखरः, परि.सं.५२,पृ -२९५

7 अष्टा. ७-२-९८

8 अष्टा. २-१-३२

9 अष्टा. ७-२-९८

10 अष्टा. ८-४-५५

11 अष्टा. ७-२-९८

विभक्तिनिमित्तकेन "**त्वमावेकवचने**[1]" इति सूत्रेण त्व आदेशस्य सिद्धत्वात्। एवञ्च "**प्रत्ययोत्तरपदयोश्च**[2]" इति सूत्रं व्यर्थं सत् परिभाषामिमां ज्ञापयति। ज्ञापनोत्तरम् अन्तरङ्गस्य "**त्वमावेकवचने**[3]" इति शास्त्रस्य प्रवृत्त्यपेक्षया बहिरङ्गस्यापि लुकः एव प्रवृत्त्या प्रत्ययपरत्वाभावेन "**त्वमावेकवचने**[4]" इति सूत्रेण त्वादेशः न प्राप्नोति। तत्सिद्ध्यर्थं "**प्रत्ययोत्तरपदयोश्च**[5]" इति क्रियमाणां सूत्रं स्वांशे चरितार्थं भवति। एतश्च "**प्रत्ययोत्तरपदयोश्च**[6]" इति सूत्रेण इयं परिभाषा ज्ञाप्यते।

अत्र शङ्का

अस्यां परिभाषायां अपि शब्दः अनावश्यक एव। तथा हि "**स्वमोर्नपुंसकात्**[7]" इति सूत्रे भाष्यग्रन्थे स्वमोर्लुक् इत्यादादिभ्यश्च इति वार्त्तिकं पठितं भगवता कात्ययनेन। तत् ब्राह्मणकुलम् इत्यत्र "**त्यादादीनामः**[8]" इति अत्वे कृते सोः लुक् न प्राप्नोतीत्यतः तत्सिद्ध्यर्थं वार्त्तिकमिदमुक्तम्। वस्तुतस्तु प्रकृतपरिभाषायाः आश्रयणे परमपि "**त्यदादीनामः**[9]" इति प्राप्तमत्वं बाधित्वा लुकः एव प्रवृत्त्या इष्टसिद्ध्या तद्वार्त्तिकमानावश्यकमेव स्यात्। परिभाषायाम् अपिशब्दाभावे तु लुकः अन्तरङ्गस्यैव बाधकत्वेन परबाधकत्वस्याभावात् प्रागुक्ते उदाहरणे परत्वात् प्राप्तस्य अत्वस्य बाधनार्थं वार्त्तिकं चरितार्थं भवति। अतः अत्र अन्तरङ्गान् विधीन् लुग्बाधते इत्येवम् अपि शब्दरहित एव पाठः युज्यत इति।

---

1 अष्टा. ७-२-९७

2 अष्टा. ७-२-९७

3 अष्टा. ७-२-९७

4 अष्टा. ७-२-९७

5 अष्टा. ७-२-९८

6 अष्टा. ७-२-९८

7 अष्टा. ७-१-२३

8 अष्टा. ७-२-१०२

9 अष्टा. ७-२-१०२

अत्र हैमवतीकाराः[1]

वस्तुतस्तु अन्तरङ्गानपि इति अपि घटितपाठो न कुत्रापि भाष्ये दृश्यते। अत एव "**स्वमोर्नपुंसकात्**[2]" इत्यत्र अपिघटितपाठः केषाञ्चिन्मतेनोपन्यस्तः कैयटेन। तथा च बहिरङ्गलुक् एवानेन बलवत्त्वम् इति।

अत्र नागेशगूढार्थदीपिकाकाराः[3]

परिभाषायामस्याम् अपिशब्दघटित पाठ एव साधुः। अत एव "**प्रत्ययोत्तरपदयोश्च**[4]" इति सूत्रभाष्येऽपि[5] **अन्तरङ्गानपि विधीन्बहिरङ्गेलुग्बाधते**[6] इत्येवम् अपिशब्दघटित पाठ एव सँल्लक्ष्यते। अतः प्रागुक्तं हैमवतीकारोक्तं न युक्तमेव इति वदन्ति।

अत्र समीक्षा

अत्र परिभाषायाम् अपिशब्दघटितपाठ एव युक्तः इति नागेशगूढार्थदीपिकाकाराणां मतं युज्यते। पूर्वपक्ष्युक्तदिशा स्वमोर्लुगित्यदादिभ्यश्च इति वार्त्तिकेनापि अपि शब्दरहितपाठः अनुमीयते इति कल्पनं तु न सम्यक्। यदि पूर्वं लुक् न स्यात् तदा त्यदाद्यत्वे "**अतोऽम्**[7]" इति अम् भावः स्यादित्येवं संभावनायाः सत्त्वेन अपवादशास्त्रप्रवृत्तिसंभावनायां पूर्वमुत्सर्गशास्त्रं न प्रवर्तते इत्यर्थकेन **उपसंजनिष्यमाणनिमित्तोऽप्यपवादः उपसंजातनिमित्तमप्युत्सर्गे बाधते** इति न्यायेन[8] पूर्वं लुकः अप्रवृत्त्या प्राप्तस्य त्यदाद्यत्वस्य वारणार्थं वार्त्तिकस्य चरितार्थत्वात्। अत एव "**स्वमोर्नपुंसकात्**[9]" इति सूत्रभाष्यस्थकैयटे केचित्तु **अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते** इत्यत्रापिग्रहणान्नित्यानां च परेषां च लुका बाधनमिच्छन्तस्त्यदाद्यत्वं लुका बाध्यत इत्याहुः। तथा चोच्यते **सर्वविधिभ्यो**

---

1 प.शे(हैमवतीसहितः), पृ -१६०

2 अष्टा. ७-१-२३

3 प.शे(नागेशगूढार्थदीपिकासहितः), पृ -२९५

4 अष्टा. ७-२-९८

5 व्या.म.भा(ष.भा), पृ -२६०

6 परिभाषेन्दुशेखरः, परि.सं -५२, पृ -२९५

7 अष्टा. ७-१-२४

8परिभाषेन्दुशेखरः,परि.सं -६५,पृ -३७१

9 अष्टा. ७-१-२३

लुग्विधिर्बलवान् इति कैयटग्रन्थः सङ्गच्छते। अयमपि कैयटग्रन्थः अत्र परिभाषायाम् अपि शब्दघटितं पाठं समर्थयति।

किञ्च केचित्तु इति प्रतीकमादायाम् त्यादादिभ्यश्चेति वक्तव्यम् इति भाष्ये काकुः। न वक्तव्यमित्यर्थः। हेतुः प्रसिद्ध एव। अन्तरङ्गानपि इति न्यायरूप इति तदाशयः इति तत्रत्यो उद्योतग्रन्थेनापि[1] परिभाषायाम् अपि शब्दघटितं पाठ एव युज्यते इति सिद्ध्यति।

अपि च **"विप्रतिषेधे परं कार्यम्[2]"** इति सूत्रभाष्यस्थः **अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते[3]** इत्यस्य **"प्रत्ययोत्तरपदयोश्च[4]"** इत्यत्र ज्ञापितत्वात् सिद्धम् इति कैयटग्रन्थेऽपि[5] अपि शब्दघटिततया प्रतिपादनं सङ्गच्छते।एवञ्च **"प्रत्ययोत्तरपदयोश्च[6]"** इति भाष्यप्रामाण्यात् **"विप्रतिषेधे परं कार्यम्[7]"**, **"स्वमोर्नपुंसकात्[8]"** इति सूत्रभाष्यस्थकैयटग्रन्थप्रामाण्यात् तत्रत्योद्योतग्रन्थप्रमाण्याच्च अत्र परिभाषायाम् अपि शब्दघटित पाठ एव युज्यत इति स्पष्टमेव प्रतीयते। एवं स्थिते **अन्तरङ्गानपीत्यपि शब्दघटित पाठो न कुत्रापि भाष्ये दृश्यते** इति कथनं हैमवतीकारणां कथं वा सङ्गच्छचे? इत्यत्र सुधियः प्रमाणम्।

गोमत्प्रियः इत्यादौ पदद्वयनिमित्तकसामासाश्रितत्वेन **"सुपो धातुप्रातिपदिकयोः[9]"** इति प्राप्तं बहिरङ्गं लुकं बाधित्वा अन्तरङ्गत्वात् **"हल्ङ्याब्भ्यो दीर्घत्सुतिस्यपृक्तं हल्[10]"** इति सु प्रत्ययस्य लोपे **"प्रत्ययलोपे प्रत्ययलक्षणं[11]"** इति प्रत्ययलक्षणेन **"उगिदचां सर्वनामस्थानेऽधातोः[1]"** इति सूत्रेण

---

1 व्या.म.भा(ष.भा), पृ -२६

2 अष्टा. १-४-२

3 परिभाषेन्दुशेखरः, परि.सं -५२,पृ -२९५

4 अष्टा. ७-२-९८

5 व्या.म.भा(ष.भा), पृ -१६२

6 अष्टा. ७-२-९८

7 अष्टा. १-४-२

8 अष्टा. ७-१-२३

9 अष्टा. २-४-७१

10 अष्टा. ७-१-६८

11 अष्टा. १-१-६२

नुमागमः, "**अत्वसन्तस्यचाधातोः**[2]" इति सूत्रेण उपधायाः दीर्घश्च स्यादित्येवं जातस्य आक्षेपस्य परिहाराय परिभाषेयमारब्धा **अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते**[3] इति प्रागुक्तमेव।

अत्र प्रश्नः

त्वत्कृतमित्यादौ प्रागुक्तरीत्या "**त्वमावेकवचने**[4]" इति सूत्रेणैव अभीष्टार्थसिद्धावपि तव पुत्रः इत्यादौ "**तवममौ ङसि**[5]" इति सूत्रप्राप्ततवाद्यादेशबाधनार्थं "**प्रत्ययोत्तरपदयोश्च**[6]" इति सूत्रमावश्यकमेव। एवञ्च इदम् अयमस्याः परिभाषायाः कथं ज्ञापकं भवति? इति।

अत्रोत्तरम्

एवं तर्हि "**प्रत्ययोत्तरपदयोश्च**[7]" इति सूत्रे मपर्यन्तस्य इत्यनुवृत्तिरस्याः परिभाषायाः ज्ञापिका भवति। इयमनुवृत्तिः सूत्रस्य प्रयोजनान्तरमपि बोधयन्ती, परम्परया परिभाषायाः ज्ञपिका भवतीति नागेशोपाध्यास्याशयः।

अत्र ज्ञापकत्वनिष्कर्षः

तथा हि यदि केवलं बाधकबाधनार्थमेवेदं सूत्रं स्यात्तदा मपर्यन्तग्रहणनुवृत्तिम् उत्सर्गसमानदेशा अपवादाः मपर्यन्तस्यैव त्वमयोस्सिद्धतया तदनुवृत्तेः फलाभावेन तत्सामर्थ्यात्त्वत्कृतमित्याद्यर्थत्वमपि तस्य सूत्रस्यावश्यकत्वं वाच्यम्। तत्र च मपर्यन्तेऽन्तरङ्गत्वाल्लुकः पूर्वं विभक्तिनिमित्तकेन "**त्वमावेकवचने**[8]" इत्यनेनैव त्वाद्यादेशसिद्धौ तदनुवृत्तिर्व्यर्था सती एतज्ज्ञापिका। ज्ञापनोत्तरं तु एतद्विषये तवादीनामप्राप्त्याऽस्य तद्बाधकत्वासंभवेनोत्सर्गसमानादेशा इति न्यायस्याप्रवृत्त्या

---

1 अष्टा. ७-१-७०

2 अष्टा. ६-४-१४

3 परिभाषेन्दुशेखरः, परि.सं -५२,पृ -२९५

4 अष्टा. ७-२-९७

5 अष्टा. ७-२-१६

6 अष्टा. ७-२-९८

7 अष्टा. ७-२-९८

8 अष्टा. ७-२-९७

त्वत्पुत्र इत्यादौ त्वत्कृमित्यादौ च मपर्यन्तस्यादेशाविधानार्थं तदनुवृत्तिस्सूत्रं च सार्थकम् इति।

अत्र समीक्षा

अत एवाग्रे ग्रन्थकृता तदनुवृत्तेस्त्वत्कृतमित्यादौ मपर्यन्तस्य त्वाद्यादेशं विधानार्थत्वं प्रतिपाद्य तत्र च "**त्वमावेकवचने**[1]" इत्यनेनैव सिद्धे तस्या वैयर्थमुक्त्वा प्रकृतपुरिभाषाज्ञापकत्वमभिहितम्। यदि केवलतदनुवृत्तेरेव ज्ञापकत्वमभिमतं स्यात्तदा, उत्सर्गसमानदेशाः इति न्यायेनैव तद्वैयर्थ्यमाशङ्कया तस्या ज्ञापकत्वं वदेत्। अत एव चानुपदं प्रत्ययग्रहणस्य युष्मदादिभ्य आचारक्विपि त्वाद्यादेशसंपादकतया साफल्यसत्त्वात्तस्य ज्ञापकता नोपपद्यत इत्याशङ्कां मनसि निधाय संपूर्णसूत्रस्य ज्ञापकतापरिभाष्यप्रमाणेन तेभ्य आचारक्विपोऽनभिधानं वक्ष्यति। यदि केवलतदनुवृत्तेरेव ज्ञापकत्वं भाष्यकृदभिमतं स्यादत्तदा तदसंगतिस्स्पष्टैव। किञ्च नैतदस्ति ज्ञापकम्। अस्त्यन्यदेतस्य वचने प्रयोजोनं किम? ये चान्ये एकवचनादेशाः प्राप्नुवन्ति तदर्थमेतत्स्यात्। तद्यथा तव पुत्रस्तत्वत्पुत्रो, मम पुत्रो मत्पुत्रः। यत्तर्हि मपर्यन्तग्रहणमनुवर्तयति। यद्यत्रान्ये एकवचनादेशास्स्युर्मपर्यन्तग्रहणानुवृत्तिरनर्थिका स्यात् इति यदि गर्भितेन स्यादिति स्युरचि च सम्भावनालिङ घटितेन च तत्सूत्रस्थभाष्येण[2] यद्यत्रान्ये इत्यादिभाष्यव्याख्यावसरे स्युरित्यस्य प्राप्नुयुरित्यर्थः। तद्बाधनार्थं चेदं स्यात्तदेति शेष इति शेषपूरणेन व्याख्यानपरत्वत्योद्यतग्रन्थेन च तदनुवृत्तिसहितसंपूर्णसूत्रस्यैव ज्ञापक्तवमित्यर्थस्स्वरसतः प्रतीयते। उद्योते चोऽवधारणे। निपातानामनेकार्थत्वात्। तद्बाधनार्थमेवेदं स्यादित्यर्थः। अनेन च यदि बाधकबाधनार्थमेवेदं स्यात्तदा उत्सर्गसमानादेशा इति न्यायेनैव मपर्यन्तस्यादेशे सिद्धे,तदनुवृत्तिर्व्यर्था स्यात्।

४.६.१ एकवचनान्तप्रकृतिकणिचोऽनभिधानम् इत्यत्र मतभेदनिरूपणम्

"**त्वमावेकवचने**[3]" इत्येव सिद्धे "**प्रत्ययोत्तरपदयोश्च**[1]" इति सूत्रं व्यर्थं सत् **अन्तरङ्गनपि विधीन्बहिरङ्गो लुग्बाधते**[2] इति परिभाषां ज्ञापयतीति प्रतिपादितं

---

1 अष्टा. ७-२-९७

2 व्या.म.भा(ष.भा),पृ -१६०,१६१

3 अष्टा. ७-२-९७

प्राक्। तथा च अस्याः परिभाषायाः आश्रयणेन गोमत्प्रियः इत्यादौ "**उगिदचां सर्वनामस्थानेऽधातोः**[3]" इति नुमागमः "**अत्वसन्तस्य चाधातोः**[4]" इति दीर्घश्च न प्रवर्तते इत्येवं परिभाषायाः प्रयोजनं प्रतिपादितम्।

अत्र प्रश्नः

युष्मदस्मच्छब्दाभ्यां प्रातिपदिकप्रकृतिके णिच्प्रत्यये त्वाद्यादेशसंपादनार्थं "**प्रत्ययोत्तरपदयोश्च**[5]" इति सूत्रे प्रत्ययग्रहणस्य आवश्यकत्वेन कथं वा इयं परिभाषा ज्ञाप्यते। इति।

अत्रोत्तरम्

भाष्यप्रामाण्येन युष्मदस्मच्छब्दाभ्यामेकार्थकाभ्यां प्रातिपदिकप्रकृतस्य णिच् प्रत्ययस्यानभिधानं बोध्यते। अतो न दोषः। न च "**मपर्यन्तस्य**[6]" इति सूत्रेभाष्ये[7] परिग्रहणस्य प्रयोजनकथनावसरे युष्मदस्मत्प्रकप्रकृतिणिजन्तात् आचारार्थे क्विप्प्रत्ययस्य भगवता भाष्यकारेण उक्तत्वेन तद्भाष्यविरोधापत्तिरिति वाच्यम्। तद्भाष्यस्य बहुवर्थविषयकतायाः स्पष्टतया विरोधाभावात्। एवञ्च युष्मदस्मच्छब्दभ्यामेकार्थकाभ्यां प्रातिपदिकप्रकृतिकणिच्प्रत्ययस्यानभिधानात् "**प्रत्ययोत्तरपदयोश्च**[8]" इति सूत्रस्य प्रकृतपरिभाषायाः ज्ञापकत्वे न किञ्चिद्बाधकम् इति।

अत्र विजयाकाराः[9]

युष्मदस्मदोराचारक्विपि णिचि वा प्रत्ययाव्यवहितपूर्वत्वेऽपि विभक्त्यव्यवहितपूर्वत्वाभावेवादेशास्याऽभिधाने प्रमाणाभावः इत्याहुः।

---

1 अष्टा. ७-२-१८

2परिभाषेन्दुशेखरः, परि.सं -५२,पृ -२९५

3 अष्टा. ७-१-७०

4 अष्टा. ६-४-१४

5 अष्टा. ७-२-१८

6 अष्टा. ७-२-९१

7 व्या.म.भा(ष.भा), पृ -१५६ -१५८

8 अष्टा. ७-२-१८

9 प.शे(विजयासहितः), पृ -२२६

अत्र भूतिकाराः[1]

"**त्वमावेकवचने[2]**" इति योगविभागसामर्थ्येन "**प्रत्ययोत्तरपदयोश्च[3]**" इति सूत्रे सिद्धान्तेऽपि विभक्त्यावित्यस्यानुवृत्त्या, अत्र प्रत्ययपरकविभक्त्यभावदेव एतदप्राप्तेः णिजादेरनभिधाने न मानम। इति वदन्ति। एवञ्च णिचोऽनभिधानस्य मूलकृता उक्तरद्याद्युक्ततामेते मन्यन्ते।

अत्र वाक्यार्थचन्द्रिकाकृतः[4]

केचित्तु "**त्वमावेकवचने[5]**" इत्येतच्छास्त्रीयविषयविषयविशेषव्यवस्थापनाय "**प्रत्ययोत्तरपदयोश्च[6]**" इत्यत्रापि विभक्तौ त्यनुवर्तनीयम्। प्रत्यये उत्तरपदे च परतो या विभक्तस्तस्यामित्येवं तदर्थः। एवञ्च त्वत्पुत्रः इत्यादावेतत्सूत्रविधेययोस्त्वमयोनिरवकाशत्वादलौकिके वाक्ये "**सुपो धातुप्रातिपदिकयोः[7]**" इत्यतः प्रथममेव प्रवृत्तेर्विनैव प्रयासं भाष्यकारोपपादिततवममादिवाधकत्वं स्वरसत उपपद्यते इति व्याख्याय ततः अग्रे इत्थञ्च प्रातिपदिकप्रकृतिके क्वपि णिचि वा प्रत्ययपरकविभक्तिपरत्वासंभवेन तन्निमित्तकयोस्त्वमयोरप्राप्तया तथाविधेश्चारितार्थ्यस्य दुर्षद्यत्वादनभिधानाश्रयणं मूलकृतो एवेत्याहुः। तथा च प्रातिपदिकप्रकृतिकणिच्प्रत्यद्यस्यानभिधानं मूलकारोक्तं न युक्तमिति तोषामाशयः।

अत्र नागेशगूढार्थदीपिकाकाराः[8]

वाक्यार्थचन्द्रिकाकारोक्तं विजयाव्याख्यात्रोक्तं च न युक्तम्। प्रकृतपरिभाषया पूर्वं लुकि "**न लुमताङ्गस्य[9]**" इति निषेधेन प्रत्ययलक्षणस्याप्रवृत्तौ प्रत्ययोत्तरपदपरकविभक्तेरभावेन ज्ञापनोत्तरमपि सूत्रस्य स्वांशे चारितार्थ्यस्य

---

1 प.शे(भूतिसहितः), पृ -१४५

2 अष्टा. ७-२-९७

3 अष्टा. ७-२-९८

4 प.शे(वाक्यार्थचन्द्रिकासहितः), पृ ३०९,३१०

5 अष्टा. ७-२-९७

6 अष्टा. ७-२-९८

7 अष्टा. २-४-७१

8 प.शे(नागेशगूढार्थदीपिकासहितः), पृ -२९९

9 अष्टा. १-१-६३

वक्तुमशक्यत्वेन ज्ञापकत्वानुपपत्तेः। यदि तु **"न लुमताङ्गस्य[1]"** इति निषेधस्यानित्यत्वात् प्रत्ययलक्षणस्य सत्त्वेन स्वांशे चरितार्थ्यं सम्भवतीत्युच्यते तर्हि **"त्वमावेकवचने[2]"** इत्येव सिद्धे पुनस्तद्रैयर्थ्यं स्पष्टमेव। **"प्रत्ययोत्तरपदयोश्च[3]"** इति सूत्रविषये तदनित्यमन्यत्र तु न इति वक्तुमशक्यम्, प्रमाणाभावात्। एवञ्च प्रागुक्तरित्या भाष्यप्रामाण्येन युष्मदस्मच्छब्दाभ्यामेकार्थकाभ्यां प्रातिपदिकप्रकृतस्य णिच् प्रत्ययस्यानभिधानामिति नागेशोपाध्यायस्य प्रतिपादनं युज्यत एव इति वदन्ति।

अत्र समीक्षा

अत्र नागेशगूढार्थदीपिकाकाराणां मतमेव युज्यत इति मे भाति। तथा हि **"सावेकाचस्तृतीयादिर्विभक्तिः[4]"** इति सूत्रे भाष्ये[5] सावेति किमिदं प्रथमैकवचनस्य ग्रहणम् आहोस्वित् सप्तमीबहुवचनस्य? इत्याशङ्क्य अन्ते सप्तमीबहुवचनस्यैवात्रग्रहणमित्याशयेन **तस्मात् सप्तमीबहुवचनस्य ग्रहणम्** इति सिद्धान्तितं भगवता भाष्यकृता। ततः त्वया मया इत्यादौ प्राप्तस्य उदात्तस्वरस्य वारणार्थं सावेकाच उदात्तत्वे त्वन्यदोः प्रतिषेधः ति वार्त्तिकमारब्धम्। किन्तु **सिद्धस्तु यस्मात् तृतीयादिः तस्याभावात् सौ** इति वदता भाष्यकृता तस्य वार्त्तिकस्य अनावश्यकत्वं प्रतिपादितम्। यस्मादत्र तृतीयादिः, न तत्सावस्ति इति तदाशयः वर्णितः। ततः प्रकृतिस्तस्यासावस्ति, तथापि सावनेकाच् तु सा भवति, इत्येवं व्याख्यातं भाष्ये। तत्र उद्योतग्रन्थः एकवचनान्तप्रकृतिकण्यन्तप्रकृतिकक्विबन्तानामनभिधानं बोध्यम् इति। एवञ्च अश्यमुद्योतग्रन्थः एकार्थकाभ्यां युष्मदस्मच्छब्दाभ्यां प्रातिपदिकप्रकृतिकणिचः अनभिधानं स्पष्टमेव प्रतिपादयतीति **अनभिधानाश्रयणं मूलकृतो दुराग्रह एव** इति वाक्यर्थचन्द्रिकाकाराणां, **अनभिधाने प्रमाणाभाव इति बोध्यम्** इति

---

1 अष्टा. १-१-६३

2 अष्टा. ७-२-९७

3 अष्टा. ७-२-९८

4 अष्टा. ६-१-१६८

5 व्या.म.भा(प.भा), पृ -१५८,१५८

विजयाव्याख्यातृणाम् एतत्समानाशयकानां भूतिभूषिततकाराणाञ्च कथनं विचारणीयमेव।

४.७. वार्णादाङ्गं बलीयो भवति

तत्कार्यप्रतिबन्धकीभूत इति विशेषणसार्थक्यविचारः

इण् धातोः लिटि प्रथमपुरुषैकवचने तिबादेशे **"परस्मैपदानां णलतुसुस्थलथुसणल्वमाः[1]"** इति सूत्रेण णल् आदेशे, धातुर्द्वित्वे **"अचो ञ्णिति[2]"** इति सूत्रेण उत्तरखण्डे इकारस्य वृद्धौ ऐकारे इ+ए+अ इति दशायां **"अभ्यासस्यासवर्णे[3]"** इति सूत्रेण अभ्यासे इकारस्य इयङ्गादेशे, उत्तरखण्डे आय् आदेशे च इय्+आय्+अ इयाय इत्यभीष्टं रूपम्। किन्तु अत्र वृद्ध्यपेक्षया अन्तरङ्गत्वात् सवर्णदीर्घे इयाय इति रूपं न सिद्ध्येदिति आक्षेपे जाते तद्वारणाय परिभाषेयमारब्धा **वार्णादाङ्गं बलीयो भवति[4]** इति वर्णनिमित्तककार्यपेक्षया अङ्गनिमित्तकं कार्यं प्रबलं भवतीति परिभाषार्थः। अत्र च **"अभ्यासस्यासवर्णे[5]"** इति सूत्रे असवर्णग्रहणं ज्ञापकमिति प्राचीनाः अभिप्रयन्ति। नागेशसिद्धान्ते तु सम्पूर्णमिदं सूत्रं परिभाषायाः ज्ञापकं भवति।

अत्र प्रश्नः

प्रकृतपरिभाषायाः अङ्गीकारेऽपि इयाय इति रूपं न सिद्ध्यत्येव। इयङादेशे कर्तव्ये **"अचः परस्मिन्पूर्वविधौ[6]"** इति सूत्रेण वृद्धेः ऐकारस्य स्थानिवद्भावेन इकारस्यैव सत्त्वेन असवर्णपरत्वाभावात् इति।

अत्रोत्तरम्

सूत्रारम्भसामार्थ्यादेव इयाय इत्यत्र **"अचः परस्मिन्पूर्वविधौ[7]"** इति स्थानिवद्भावः न प्रवर्तते। स्थानिवद्भावे प्रवर्तिते तु सवर्णस्यैव परत्वेन

---

1 अष्टा. ३-४-८२

2 अष्टा. ७-२-११५

3 अष्टा. ६-४-७८

4 परिभाषेन्दुशेखरः,परि.सं. -५५, पृ -३१२

5 अष्टा. ६-४-७८

6 अष्टा. १-१-५७

7 अष्टा. १-१-५७

असवर्णपरत्वाभावात् इयङादेशस्य कुत्रापि अप्रवृत्त्या सूत्रं व्यर्थमेव स्यात्। इदञ्च व्यर्थं सत् अत्र स्थानिवद्भावस्याप्रवृत्तिं ज्ञापयति। इदञ्च सामान्यापेक्षं ज्ञापकम्। तथा च अभ्यासकार्ये तदुत्तरखण्डादेशस्य अभ्यासकार्यप्रतिबन्धकीभूतं स्थानिवत्त्वं न इति ज्ञाप्यते। अत एव आरति इत्यत्र ऋ धातोः यङ्लुगन्तात् लटि 'झि' प्रत्यये "**सन्यङोः**[1]" इति द्वित्वे "**अदभ्यस्तात्**[2]" इति सूत्रेण 'झस्य' अदादेशे अभ्यासस्य स्थाने "**उरत्**[3]" इति सूत्रेण अकारदेशे हलादिश्शेषे "**रुग्रिकौ च लुकि**[4]" इति सूत्रेण अभ्यासस्य रुगागमे अर्+ऋ+अति इत्यवस्थायां उत्तरखण्ड ऋकारस्य यणि "**रोरि**[5]" इति सूत्रेण रेफस्य लोपे "**ढलोपे पूर्वस्य दीर्घोऽणः**[6]" इति सूत्रेण अकारस्य दीर्घे च आरहति इति सिद्ध्यति। उक्तज्ञापकस्य सामान्यापेक्षत्वानङ्गीकारे तु दीर्घे कर्तव्ये उत्तरखण्डादेशस्य यणः स्थानिवत्वे रेफलोपनिमित्तकपरत्वाभावात् दीर्घः न स्यात्। अतः आरति इत्यादीनां रूपाणां सिद्ध्यर्थमस्य सामान्यापेक्षं ज्ञापकत्वमभ्युपगन्तव्यम् इति।

४.७.१ तत्कार्यप्रतिबन्धकीभूत इति विशेषणप्रयोजनम्

सामान्यापेक्षज्ञापकाकारे(स्वरूपे) तत्कार्यप्रतिबन्धकीभूत इति विशेषणदानेन अरिग्रियादित्यत्र, स्थानिवद्भावेन इयङादेशः भवत्येव। तथा हि ऋधातोर्यङ्लुगन्तादशीर्लिङि द्वित्वेऽभ्यासस्योरदत्वे हलादिश्शेषेऽभ्यसस्य रिगागमे, अरि, ऋ, यात् इत्यवस्थायाम् इयङ् परत्वात् "**रिङ् शयिग्लिङ्षु**[7]" इति सूत्रेण रिङादेशे पुनः प्रसङ्गविज्ञानात्तस्य स्थानिवत्त्वेनेयङादेशसिद्धिः। अत्र तादृशविशेषणाभावेत्यनेन स्थानिवत्त्वनिषेधादसवर्णाच्परत्वाभावेनेयङ् न स्यात्। सति तु तद्विशेषेणाभावेत्यनेन स्थानिवद्भावस्याभ्यासकार्यसाधकत्वेऽपि तत्प्रतिबन्धकत्वाभावेन निषेधाप्रवृत्त्या इयङ् सिद्धिरिति भावः। एवञ्चात्र ज्ञापकाकारे तत्कार्यप्रतिबन्धकीभूत इति विशेषणमावश्यकमेव।

---

1 अष्टा. ६-१-९

2 अष्टा. ७-१-४

3 अष्टा. ७-४-६६

4 अष्टा. ७-४-१११

5 अष्टा. ८-३-१४

6 अष्टा. ६-३-१११

7 अष्टा. ७-४-२८

अत्र केचित्तु[1]

अरिग्रियादित्यत्र क्रमिकान्वाख्यानपक्षे पूर्वोपस्थितनिमित्तकत्त्वरूपमन्तरङ्गत्वमादाय रिङादेशात्पूर्वमेव इयङः प्रवृत्तिः अभ्युपगम्यते। अतः तत्कार्यप्रतिबन्धकीभूत इति विशेषणमनावश्यकमेव इति वदन्ति।

अत्र नागेशगूढार्थदीपिकाकाराः[2]

प्रकृते ज्ञापेन तत्कार्यप्रतिबन्धकीभूत इति विशेषणमावश्यकमेव। पदस्य विभज्यान्वाख्याने प्रक्रियाक्रमाधीनपूर्वोपस्थितनिमित्तकत्वरूपमन्तरङ्गत्वं रिङ एवास्तीतीयङः पूर्वं रिङादेशे स्थानिवत्त्वेनैवेयङादेशप्रवृत्तेर्वाच्यतया, इदं विशेषणमावश्यकमेव। यदि तु पक्षयोर्लक्ष्यानुरोधेन व्यवस्थितत्वादेतद्विषये क्रमिकान्वाख्यानमेवाश्रित्य कालिकेन च तादृशान्तरङ्गत्वेन रिङः पूर्वमियङादेश इत्युच्यते तदा एतद्विशेषणफलमरिग्रीतीत्यादि बोध्यम्। ऋधातोर्यङ्लुगन्ताल्लटि 'झि' प्रत्यये अदादेशे, द्वित्वेऽभ्यासकार्येषु रिकि+अरि+ऋ+अति इत्यवस्थायां वर्णमात्राश्रयत्वेनान्तरङ्गत्वादियङः पूर्वं यणादेशे ततः स्थानिवत्त्वं नेत्येतावन्मात्रोक्तावनेन स्थानिवद्भावनिषेधात्तदसिद्धिः। उक्तविशेषणदाने तु प्रकृते स्थानिवत्त्वस्याभ्यासकार्यसाधकत्वेऽपि प्रतिबन्धकत्वाभावेन न निषेधप्रसक्तिरिति बोध्यम्। नचात्रापि वर्णमात्राश्रयत्वेन यणादेशस्येव प्रागुक्तदिशा इयङोऽप्यन्तरङ्गत्वादुभयोरन्तरङ्गयोः परत्वादियङादेशे, इदमपि फलं दुर्निरूपमिति वाच्यम्। इयङपेक्षया नित्यत्वाद्यण एव प्रवृत्त्या फलस्य सुवचुत्वात्। नचैतद्विशेषणे, इयामीत्यत्रायादेशस्य स्थानिवत्त्वेन लघूपधगुणापत्तिः। तत्स्थानिवत्वस्याभ्यासकार्यप्रतिबन्धकत्वाभावेनैतन्निषेधस्याप्राप्तेरिति वाच्यम्। बहिर्भूतप्रत्यार्थक्षत्वेन बहिरङ्गगुणापेक्षयाऽन्तरङ्गत्वादियङः प्रवृत्त्या अदोषात्। नवैवमचचकाणदित्यत्र काम्यदीनां वा इति ह्रस्वाभावपक्षे वृद्धेः स्थानिवत्त्वे लघुत्वादभ्यासस्य लघुपरत्वेन सन्वद्भावपत्तिः। तत्स्थानिवद्भावस्याभ्यासकार्यप्रतिबन्धकत्वाभावेनोक्तनिषेधाप्रवृत्तिरिति वाच्यम्।

1प.शे(नागेशगूढार्थदीपिकासहितः), पृ -३२७

2प.शे(नागेशगूढार्थदीपिकासहितः), पृ -३२७,३२८

अभ्याससंबन्धिकार्यमात्रे कर्तव्येऽभ्यासानवयवकधातोर्योऽयमयवय उत्तरखण्डसंबन्धी अभ्यासाद्व्यवहितपराजूपस्तस्य च आदेशस्तस्याभ्यासकार्यप्रतिबन्धकीभूतं स्थानिवत्त्वं नेति तदर्थेनादेषात्। अत एव यातिरित्यादिसिद्धिः। यातेर्यङन्तात् क्तिचि द्वित्वे यङोऽकारस्य "**आतो लोप इटि च**[1]" इत्यनेन लोपे "**लोपो व्योर्वलि**[2]" इति सूत्रेण यकारस्य लोपे यङोऽकारलोपस्य स्थानिवत्त्वेनोत्तरखण्डसम्बन्धाकारस्य लोपे पुनर्यलोपे यातिरिति सिद्धिः।अभ्याससम्बन्धाकारस्य तु न पुनर्लोपः। उत्तरखण्डसम्बन्ध्याकारलोपस्य स्थानिवत्त्वात्। अभ्यासकार्ये तदुत्तरखण्डादेशस्येत्यत्र निरुक्तार्थाविवक्षणे तूत्तरखण्डसम्बन्धाकारलोपस्यानेन स्थानिवत्त्वनिषेधात्पुनरालोपे यलोपे च प्रत्ययमात्रस्य श्रवणं प्रसज्यते। ईदृशार्तविवक्षणे तूत्तरखण्डसम्बन्ध्याकारस्याभ्यासादव्यवहितपरत्वाभावान्न तदादेशस्यानेन स्थानिवत्त्वनिषेधे इति बोध्यम्। एतेनौनदित्यादौ "**अत उपधायाः**[3]" इति वृद्ध्यापत्तिरित्यापि परास्ता। तत्राभ्यासोत्तरखण्डस्यानर्थकत्वेन तन्मात्रे धातुत्वस्य युक्तत्वमशक्यतयाऽभ्यासविशिष्टस्यैव धातुत्वादुत्तरखण्डसम्बध्यल्लोपस्याभ्यासानववयवकधात्ववयवादिशत्वाभावेनाभ्यासादव्यवहितपराजादेशत्वाभावेन च प्रकृतनिषेधमित्यङ्गस्या स्थानिवत्त्वेन वृद्ध्यप्राप्तेः। नचैवमभ्यासकार्य इति विशेषणं व्यर्थम्। नित्ये इत्यत्रोत्तरसङ्गस्य सम्बन्धीकारस्यभ्यासादव्यहितपरत्वाभावेनैव प्रकृतनिषेधाप्रवृत्त्या दोषमुक्तमिति वाच्यम्। अश्रर्मिग्रहकमानलब्धस्य तादृशाविशेषणस्याभावे तादृशप्रत्यासत्तेरप्यश्रयितुमशक्यत्वमाश्रय तदुपादानादिति बोध्यम् इत्यभिप्रयन्ति।

अत्र समीक्षा

"**अभ्यासस्या सवर्णे**[4]" इति सूत्रस्य प्रकृतपरिभाषाज्ञापकत्वं प्रदर्शितं नागेशोपाध्यायेन। तत्र च **असति बाधके प्रमाणानां सामान्ये पक्षपातः** इति न्यायेन समान्यापेक्षज्ञापकत्वं च प्रदर्शितं तेन। एवं सति अरिग्रियात् इति यत्र ग्रन्थस्य दोषस्य

---

1 अष्टा. ६-४-६४

2 अष्टा. ६-१-६६

3 अष्टा. ७-२-११६

4 अष्टा. ६-४-७८

वारणाय ज्ञापकाकारे तत्कार्यप्रतिबन्धकीभूतं इति विशेषणे दोषमिति मूलकृता कण्ठतः उक्त इति तन्निराकरणं केचित्काराणां न युज्यत इति।

४.८. अकृतव्यूहाः पाणिनीयाः

अत्र ज्ञापनविषये मतभेदनिरूपणम्

षद्लृ विशरणगत्यवसादनेषु इत्यास्माद्धातोः "**धात्वादेः षःसः**[1]" इति षकारस्य सकारे "**छन्दसि लिट्**[2]" इति लिट् लकारे, "**क्वसुश्च**[3]" इति सूत्रेण तस्य स्थाने क्वसु आदेशे, अनबन्धलोपे, सद् वस् इत्यवस्थायां धातोर्द्वित्वे "**अत एकहल्मध्येऽनादेशार्लिटि**[4]" इति सूत्रेण एत्वाभ्यासलोपयोः कृतयोः सेद्+वस् इति दशायाम्, "**कृत्तद्धितसमासाश्च**[5]" इति सूत्रेण समुदायस्य प्रातिपदिकत्वे, ततः "**स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्यस्ङसोसम्ङ्योस्सुप्**[6]" इति सूत्रेण 'शस्' प्रत्यये अनुबन्धलोपे सेद्+वस्+अस् इति दशायाम् "**वसोःसम्प्रसारणम्**[7]" इति वकारस्य सम्प्रसारणे उकारे "**सम्प्रसारणाच्च**[8]" इति पूर्वरूपे, "**शासिवसिघसीनां च**[9]" इति सकारस्य षत्वे सेदुष् अस्=सेदुषस् इति जाते, सकारस्य रुत्वे विसर्गे च सेदुषः इति रूपम्।

अत्र प्रश्नः

सेद्+वस्+अस् इति दशायामिडागमसम्प्रसारणयोः प्राप्तयोः अन्तरङ्गत्वात् डागमे ततः सम्प्रसारणे कृतेऽपि इटः श्रवणं स्यादेव इति।

---

1 अष्टा. ६-१-६४

2 अष्टा. २-२-१०५

3 अष्टा. ३-२-१०७

4 अष्टा. ६-४-१२०

5 अष्टा. १-२-४६

6 अष्टा. ४-१-२

7 अष्टा. ६-४-१३१

8 अष्टा. ६-१-१०८

9 अष्टा. ८-३-६०

अत्र समाधानम्

अकृतव्यूहः पाणिनीयाः[1]। न कृतः विशिष्टः ऊहः= निश्चयः= शास्त्रप्रवृत्तिविषयः यैः ते अकृतव्यूहाः पाणिनीयाः इत्यस्य विशेषणमिदम्। तथा च पाणिनीयाः शास्त्रप्रवृत्तिविषयकनिश्चयाभाववन्तः इत्यर्थः सिद्ध्यति। अत्र भाविनि निमित्तविनाशे इत्यध्याह्रियते। एवं च निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्तीत्यर्थः। बहरिङ्गेण अन्तरङ्गस्य निमित्तविनाशे पश्चात् संभाविते अन्तरङ्गमपि शास्त्रं न प्रवर्तते इति निष्कृष्टो अर्थः।

"**समर्थानां प्रथमाद्वा**[2]" इति सूत्रे समर्थानाम् इति पदमस्याः परिभाषायाः ज्ञापकम्। तथा हि सूत्थितस्यापत्यं पुमानित्यर्थे सु+उत्थित इति दशायाम् "**अकः सवर्णे दीर्घः**[3]" इति सवर्णदीर्घः "**अत इञ्**[4]" इति इञ् प्रत्ययश्च प्राप्तः। तत्र आदौ इञः वारणार्थं समर्थग्रहणं कृतम्। वस्तुतस्तु तत्र अन्तरङ्गत्वात् सवर्णदीर्घे कृते, तदनन्तरमेव इञ् प्रत्ययस्य प्रवृत्त्या, आदौ इञ् प्रत्ययस्य प्रवृत्तिवारणार्थं क्रियमाणां समर्थग्रहणं व्यर्थमेव। तच्च व्यर्थं सत् परिभाषामिमां ज्ञापयति। ज्ञापनोत्तरं सु+ उत्थित इति दशायां भाविनि "**तद्धितेष्वचामादेः**[5]" इति आदिवृद्ध्या सवर्णाच्त्वविनाशः स्पष्ट एव। तथा च अनया परिभाषया पूर्वं सवर्णदीर्घाप्रवृत्तौ अकृतसन्धेरेव इञ् प्रत्यये अदिवृद्धौ, च सौत्थितिः इत्यभीष्टस्य रूपस्य स्थाने सावुत्थितिः इत्यनभीष्टं रूपं स्यात्। अतस्तद्वरणार्थं "**समार्थानां प्रथमाद्वा**[6]" इति सूत्रे समर्थग्रहणम्। इत्थं परिभाषेयम् सिद्धा।

अत्र प्राचीनाः[7]

"**गोरतद्धितलुकि**[1]" इति सूत्रे तद्धित ग्रहणस्याः परिभाषायाः ज्ञापकम्। तथा हि गोऽन्तात् तत्पुरुषात् टच् स्यात् इति तत्सूत्रार्थः। उदा पञ्चगवम्। सूत्रे अतद्धितलुकि

---

1 परिभाषेन्दुशेखरः, परि.सं -५६,पृ -३३०

2 अष्टा. ४-१-८२

3 अष्टा. ६-१-१०१

4 अष्टा. ४-१-१५

5 अष्टा. ७-२-११७

6 अष्टा. ४-१-८२

7 प.शे(नागेशगूढार्थदीपिकासहितः), पृ -३३०,३३१

इति कथनेन यत्र तद्धितस्य लुग्विधीयते तत्र तु नायं टच् प्रत्ययः प्रवर्तते। यथा पञ्चगुः। अत्र पञ्चभिः गोभिः क्रीतः इत्यर्थे पञ्चगो इति प्रातिपदिकं "**तेन क्रीतम्**[2]" इति सूत्रेण ठक् प्रत्ययः। तस्य च "**अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम्**[3]" इति सूत्रेण ठकः लुक्। एवञ्चात्र तद्धितस्य लुकः सद्भावेन टच् प्रत्ययः न प्रवर्तते। अतः एतादृशप्रयोजनसिद्ध्यर्थं "**गोरतद्धितलुकि**[4]" इति सूत्रे अतद्धित ग्रहणं कृतम्। अत्र सूत्रे तद्धित ग्रहणं परित्यज्य गोरलुकि इत्येव यदि सूत्रं स्यात् तर्हि राजगवीयति इत्यत्र दोषापत्तिः। तथा हि राजगंव आत्मनः इच्छति इत्यर्थे "**सुप आत्मन क्यच्**[5]" इति सूत्रेण क्यचि, अनुबन्धलोपे, अमो लुकि "**क्यचि च**[6]" इति सूत्रेण अकारस्य ईत्वे राजगवीयति इति रूपम्। अत्र सुपो लुकि(अम् प्रत्ययस्य लुकि) निषेधवारणार्थं तद्धितग्रहणं कृतम्। वस्तुतस्तु राजगवीयति इत्यत्र अन्तरङ्गत्वात् लुकः पूर्वं 'टच्' प्रत्ययस्य प्रवृत्तेरिष्टसिद्ध्या तद्धितग्रहणं व्यर्थमेव। तच्च व्यर्थं सदिमां परिभाषां ज्ञापयति। ज्ञापनोत्तरं लुकः भावित्वेन अलुग्रूपनिमित्तविनाशात् टचः असिद्ध्यापत्तिः। अतः तत्र टचः सिद्ध्यर्थं क्रियमाणं तद्धितग्रहणं चरितार्थं भवति इति वदन्ति।

अत्र नागेशगूढार्थदीपिकाकाराः[7]

प्रचीनोक्तं ज्ञापक्तवं न युक्तम्। तथा हि **अन्तरङ्गनपि विधीन् बहिरङ्गो लुग्बाधते**[8] इति परिभाषायाः टचः पूर्वं लुकः एव प्रवृतया सूत्रे तद्धितग्रहणाभावे सुब्लुकः सत्त्वेन टच् प्रत्ययस्य अप्रवृत्यापत्तिः। अतः तत्सिद्ध्यर्थं तद्धितग्रहणस्य आवश्यकत्वेन न तत्परिभाषायाः ज्ञापकं भवितुमर्हति। अतः "**समार्थानां प्रथमाद्वा**[9]" इति सूत्रे समर्थग्रहणमेव अस्याः परिभाषायाः ज्ञापकमिति आशेरते।

---

1 अष्टा. ५-४-१२

2 अष्टा. ५-१-३७

3 अष्टा. ५-१-२८

4 अष्टा. ५-४-१२

5 अष्टा. ३-१-८

6 अष्टा. ७-४-३३

7 प.शे(नागेशगूढार्थदीपिकासहितः), पृ -३३१

8 परिभाषेन्दुशेखरः परि.सं.५२,पृ -२९५

9 अष्टा. ४-१-८२

अत्र समीक्षा

"**गोरतद्धितलुकि**[1]" इति सूत्रे तद्धितग्रहणेन इयं परिभाषा ज्ञाप्यते इति वदतां प्राचीनानामशयः न युक्तः। ज्ञापकत्वकथने व्यापृतचित्तानां तेषां स्मृता। **अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते**[2] इति परिभाषा न स्थिता। अत एव इयं भ्रान्तिः। अतोऽत्र "**समर्थानां प्रथमाद्वा**[3]" इति सूत्रे समर्थग्रहणेनैव परिभाषेयं ज्ञाप्यत इति कथनमेव युज्यतेतरामिति मे भाति।

४.९. येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति।

सत्यपि सम्भवे बाधनं भवति इत्यत्र मतभेदप्रदर्शनम्

यत्कर्तृकावश्यकप्राप्तौ यो विधिरारभ्यते स विधिः तस्य बाधको भवति इति परिभाषार्थः। उदा कृष्णैकत्वम्। कृष्णा+एकत्वम् इत्यवस्थायाम् "**आद्गुणः**[4]" इति सूत्रेण गुणः प्राप्तः, एवं "**वृद्धिरेचि**[5]" इति सूत्रेण वृद्धिश्च प्राप्ता। गङ्गोदकम् इत्यादिस्थले गुणश्चरितार्थः। यदि कृष्णैकत्वमित्यादावपि स एव स्यात् तर्हि वृद्धिविधानं व्यर्थमेव स्यात्। एवञ्चात्र यत्कर्तृकावश्यकप्राप्तौ="**आद्गुणः**[6]" इत्येतत्सूत्रकर्तृकगुणस्य प्राप्तौ, यो विधिरारभ्यते="**वृद्धिरेच**[7]" इति वृद्धिरारभ्यते, अयं वृद्धिविधिः गुणस्य अपवादो भवति। अतो अत्र वृद्धिरेव प्रवर्तते, न तु गुणः। एवं च विशेषशास्त्रोद्देश्यविशेषधर्माविच्छिन्नवृत (एच्परक अकारः) सामान्यधर्मावाच्छिन्नोद्देश्यकशास्त्रस्य(अच्परक अकारः) विशेषशास्त्रेण बाधः इति पलितोऽर्थः। तथा च उत्सर्गप्राप्तियोग्यताविरहविशिष्टे लक्ष्ये चारितार्थ्याभावः बाधकत्वे बीजम्।

---

1 अष्टा. ५-४-९२

2 परिभाषेन्दुशेखरः, परि.सं५२, पृ -२९५

3 अष्टा. ४-१-८२

4 अष्टा. ६-१-८७

5 अष्टा. ६-१-८८

6 अष्टा. ६-१-८७

7 अष्टा. ६-१-८८

अत्र चन्द्रिकाकाराः[1]

केचित्तु यत्र समाने विषये, भिन्ने वा सामान्यप्रवृत्त्युत्तरं विशेषविहितस्य प्रवृत्तियोग्यता तथाभूतोऽस्य विषयः, लोके तथैव दर्शनात्। प्रकृते तु कृते नुट्यचिरादेशस्य प्रवृत्तियोग्यताया दौर्लभ्यान्न्यायविषयत्वायोगेन निरवकाशत्वप्रयुक्तस्यैव बाधकस्य विषयभेदेऽपि प्रवृत्ताविदं भाष्यं गमकमिति वक्तुं युक्तमिति वदन्ति इत्याहुः। तथाच निरवकाशत्वप्रयुक्तस्यैव बाधकत्वस्य विषयभेदेऽपि प्रवृत्तौ इदं भाष्यं प्रमाणमिति हरिशास्त्रिणमाशयः।

अत्र भैरवीकाराः[2]

तिसृणां चतसृणामित्यत्र अचिरादेशस्य बाध्यसामान्यचिन्तया गुणदीर्घोत्वबाधकत्वमपि नुड्बाधकत्वमपि स्यादिति या शङ्का सा तस्य निरवकाशत्वेनापवादात्वपक्षे,न तु येन नप्राप्तान्यायेन नुट्प्रवृत्त्युत्तरं रादेशाप्राप्तेः। विषयभेदेऽपि अपवादत्वं भवतीत्यत्र तु दृष्टान्तता बोध्या। एवञ्च निरवकाशत्वप्रयुक्तस्यैव बाधकत्वस्य विषयभेदेऽपि प्रवृत्तौ इदं भाष्यं प्रमाणमिति मिश्राणामाशयः।

अत्र नागेशगूढार्थदीपिकाकाराः[3]

नागेशगूढार्थदीपिकाकाराः इत्थमभिप्रयन्ति एवं स्थिते सत्यपि संभवे बाधनं भवतीति "**मिदचोन्त्यात्परः[4]**" इति सूत्रे भाष्ये उक्तम्। अन्यथा **ब्रह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय** इति न्यायेन अत्र तक्रदानेन दधिदानस्य बाधः न स्यात्, दधिदानोत्तरं ततः पूर्वं तक्रदानस्य चारितार्थ्यासंभवात्। एवं च साक्षादुद्देश्यतावच्छेदकयोः भेदेन यौगपद्यासंभवरूपविरोधाभावेऽपि अपवादत्वं सिद्ध्यति। अत एव तिसृ+आम् इत्यवस्थायाम् "**अचि र ऋतः[5]**" इति सूत्रेण रेफादेशे,"**ह्रस्वनद्यापो नुट्[6]**" इति सूत्रेण नुडागमे च प्राप्ते, रादेशेन नुटः अपवादत्वात्

---

1 प.शे(वाक्यार्थचन्द्रिकासहितः), पृ -३५५

2 प.शे(भैरवीसहितः), पृ -१७८

3 प.शे(नागेशगूढार्थदीपिकासहितः), पृ -३५३

4 अष्टा. १-१-४७

5 अष्टा. ७-२-१००

6 अष्टा. ७-१-५४

बाधमाशङ्क्य "**न तिसृचतसृ**[1]" इति ज्ञापकेन समाहितं "**तृज्वत्क्रोष्टुः**[2]" इति सूत्रे भाष्ये। तथा हि नुटं बाधित्वा रादेशे तदुत्तरं नुडागमस्य अप्राप्त्या तिसृचतसृ शब्दयोः नाम्परत्वासंभवेन दीर्घस्य प्रसेरेव अभावात् नामि परे "**न तिसृचतसृ**[3]" इति दीर्घेनिषेधकथनं व्यर्थं स्यात्। अतः रादेशे नुडागमयोः न बाध्यबाधकभावः। विषयभेदे तदनङ्गीकारे तु तयोः बाध्यबाधकभावशङ्कायाः ज्ञापकत्वाश्रयणेन तत्सामाधानकथनस्य च असङ्गत्यापत्तिः। एवञ्च सत्यपिसम्भवे बाधनं भवति इत्यत्र "**तृज्वत्क्रोष्टुः**[4]" इति सूत्रस्थ भाष्ये[5] प्रमाणमिति सिद्धम्।

अत्र समीक्षा

सत्यपि सम्भवे बाधनं भवति इत्यत्र "**मिदचोऽन्त्यात् परः**[6]" इति सूत्रस्थभाष्यं[7] प्रमाणम्। तथा हि लोके हि सत्यपि सम्भवे बाधनं भवति। तद्यधा **दधि ब्रह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय** इति, सत्यपि सम्भवे दधिदानस्य तक्रदानं निवर्तकं भवति। इत्युक्तं भगवता पतञ्जलिना। निरवाकाशत्वेन संयोगान्तलोपबाधकम्। अत एव रथीतरसिद्धिः। अन्यथा नलोपं बाधित्वा नस्येत्त्वे तस्यासिद्धत्वात्सवर्णदीर्घानापत्तिः। अत एव धुक्, सुवृडित्यादौ भषभावघत्वादिषु कृतेषु जश्त्वादिसिद्धिः। अन्यथाऽपवादत्वात्तैर्जश्त्वापवादत्वापत्तिः। "**अचो रहाभ्यां द्वे**[8]" इति सूत्रे रहाभ्यामिति निमित्तत्वेन कार्यित्वबाधस्तु हयवरडिति सूत्रस्थभाष्यबलादेव। अस्तु वा त्रिपाद्यामितरविधिषु यथा तथा।नलोपविषये तु ईद्रथिनः रथीतरः भूरिदाव्रस्तुड् वाच्यः भूरिदावदत्तर इति भाष्यप्रयोगबलेन नोस्तग्रापवादभावः। अत एव "**नलोपः प्रातिपदिकान्तस्य**[9]" इति सूत्रे भाष्येऽप्यनवकाशो रुर्नलोपं बाधिष्यत इत्यस्यैव सिद्धान्त्युक्तित्वेनानन्त्याकारे सावकाशत्वप्रतिपादनपरतदुत्तरभाष्यस्थासंभव एव

---

1 अष्टा. ६-४-४

2 अष्टा. ७-१-९५

3 अष्टा. ६-४-४

4 अष्टा. ७-१-९५

5 व्या.म.भा(ष.भा), पृ -९१

6 अष्टा. १-१-४७

7 व्या.म.भा(प्र.भा), पृ -४०१

8 अष्टा. ८-४-४६

9 अष्टा. ८-२-७

बाधकत्वमिति वार्त्तिकानुसारेण प्रवृत्ततया स्वानभिप्रेतत्वेन तद्बलेन तन्न्यायस्य त्रिपाद्यामप्रवत्तेर्वक्तुमशक्यत्वात्। किं च तस्य त्रिपाद्यामप्रवृत्तौ संयोगादिलोपस्य संयोगान्तलोपबाधकत्वं न सिद्ध्येत्। तत्र निरवकाशत्वेन बाधकत्वं तु न युक्तम्। संयोगान्तलोपोत्तरं संयोगादिलोपस्य चारितार्थ्याभावेऽपि तत्प्रवृत्तिसमकालमस्यापि प्रवृत्तौ बाधकाभावेन सर्वथा निरवकाशत्वाभावात्। संयोगादित्वस्योपलक्षणत्वेन कृते चारितार्थ्यस्यापि सत्त्वाच्च। अत एव ईट्त्वादिसिद्धिः। अन्यथा संयोगादिलोपोत्तरं तस्यासिद्धत्वात्पुनस्संयोगान्तलोपो दुर्वार एव स्यात्। अपवादस्य यं प्रत्यपवादत्वं तदृष्ट्यासिद्धत्वं तु तस्य न युक्तम्। संयोगादिलोपोत्तरं संयोगान्तलोपप्रवृत्तावपि संयोगादिलोपस्य वैयर्थाभावेन तदुत्तरं तस्यासिद्धत्वबाधकल्पनायां मानाभावः इति।

४.९.१.तक्रकौण्डिन्यन्यायस्य अत्र शास्त्रेऽनाश्रयणे चन्द्रिका दीपिकाकारयोःऐकमत्यम्।

"**मिदचोन्त्यात्परः**[1]" इति सूत्रे भाष्ये[2] विनर्थमिदमुच्यते इत्याशङ्क्या "**मिदचोन्त्यात्परः**[3]" इति स्थानपरप्रत्ययमिदं इति समाहितम्। "**षष्ठी स्थानेयोगा**[4]" इति सूत्रस्य "**प्रत्ययः**[5]" "**परश्च**[6]" इत्यस्य च अपवादोऽयमिति तदर्थः। तत्र स्थाने योगत्वस्य अपवादत्वे कुण्डानि, फलानि, फलसिं यशांसि इति उदाहरणचतुष्टयं प्रदर्शितम्। तत्र पुनः शङ्किकतं कुण्डानि, फलानि इत्यक्तस्य युज्यते तत्र नास्ति सम्भवः यदयमचः अन्त्यात् परश्च स्यात् स्थाने चेति हेतोः। यशांसि इत्युदाहरणं तु न युज्यते। अस्ति हि सम्भवे यदयम् अचः अन्त्यात् परश्च स्यात् स्थाने चेति। एवं च असम्भवे एव बाधकत्वम्, विरोधस्य तद्बीजत्वात् इत्येवं वार्त्तिककाराणां मतम्। इदं तु मतं न युज्यते, भाष्यकृता दूषितत्वादिति **येन नाप्राप्ते योविधिरारभ्यते स तस्य बाधको भवति**[7] इति परिभाषायाः व्याख्यावसरे श्रीमता नागेशेन प्रतिपादितम्[1]।

---

1 अष्टा. १-१४७

2व्या.म.भा(प्र.भा), पृ -४०१

3 अष्टा. १-१४७

4 अष्टा. १-१-४९

5 अष्टा. ३-१-१

6 अष्टा. ३-१-२

7 परिभाषेन्दुशेखरः,परि.सं.५८.,पृ -३४५

अत्र वाक्यर्थचन्द्रिकाकृतः[2]

अत्रेत्थं वार्त्तिकमतप्रपञ्चः। तक्रकौण्डिन्यायः नात्र शास्त्रे आश्रयितुं शक्यते। तक्रदानोत्तरं तस्यामेव व्यक्तौ दधिदानस्य प्रवृत्तियोग्यतायमपि विशेषप्रतिहितेन तक्रदानेन दधिदानस्य बाधो दृश्यते। शास्त्रे तु "**दयतोर्दिगिलिटि**[3]" इत्यादि सूत्रविहित दिग्यादेशादौ प्रवृत्ते सामान्ये व्यक्त्यन्तरे प्रवृत्तियोग्येन विशेषविहितेनोत्सर्गबाधनम् इति न्यायाननुगुणत्वात्। किञ्च फलभावोऽपि न्यायाश्रयणे। तथा हि सामान्यशास्त्रप्रवृतयुत्तरकालिकं चारितार्थ्यामादाय विशेषविहितस्य लब्धावकाशतया प्रकृतविषये विप्रतिषेधशास्त्रबलादेवोत्सर्गनिवृत्तिसिद्धौ किमनेन न्यायेन। "**विप्रतिषेधे परं कार्यम्**[4]" इति सूत्रे च केवलमेकस्य द्विकार्ययोगात्मक एव विरोधो बाधकताबीजम्, अपि तु भिन्नविषययोरपि कार्ययोर्यौगपद्येन प्रवृत्त्यसम्भवरूपोऽपीति स्पष्टमन्यत्र।

अत एव शिष्टात् इत्यादौ परेण तातङादिना शाभावादिर्बाध्यते। अथ परत्वाभावो यत्र बाधकस्य यथा परमस्त्रजिष्टः, सुश्रयिष्टः इत्यादौ विन्मतोर्लुका टिलोपस्य बाधने, तत्र पूर्वविप्रतिषेधाश्रयणेन निर्वाहः। न च अहः अहोभ्याम् इत्यादौ रत्वरुत्वयोरसिद्धत्वातप्राप्तस्य नलोपस्य बाधनमेतन्न्यायप्रयोजनमिति वाच्यम्।"**अहन्**[5]" इति सूत्रस्यावृत्त्या नलोपाभावनिपातनेन तदुपपत्तेः। न च यशांसि पयांसि इत्यादौ झलन्तलक्षणस्य नुमो "**मिदचोन्त्यात्परः**[6]" परत्वेन स्थानेयोगत्वस्य बाधनमेतन्न्यायस्यानन्यथासिद्धिं प्रयोजनम्, नहि तत्र विप्रतिषेधशास्त्रेण व्यवस्था सम्भवति विरोधाभावादिति वाच्यम्। "**गुणानाञ्च परार्थत्वात्**"[7] इति न्यायेन परस्परमनन्विताभ्यामेव ताभ्यां पृथक् प्राधानोपकारेण लक्ष्यसंस्कारे चरमव्यञ्जनविशिष्टस्यैकया साधुत्वम्, अपरया च तद्विरहितस्येति विरोधस्य सुवचत्वात्, तस्मादिह शास्त्रे तादृशन्यायस्यानाश्रयणमेवेति। अनया रीत्या

---

1 प.शे(नागेशगूढार्थदीपिकासहितः), पृ – ३५४,३५५

2 प.शे(वाक्यार्थचन्द्रिकासहितः), पृ -३४६,३४७

3 अष्टा. ७-४-९

4 अष्टा. १-४-२

5 अष्टा. ८-२-६८

6 अष्टा. १-१४७

7 जै.सू. ३-१-२२

वार्तिककाराणां मतं प्रदर्श्य द्वित्वनिष्पन्नस्यापि सादृश्यमूलकाभेदाध्यवसायेव तव्यक्तित्वस्य सुवचत्वान्न लोकन्यायवैगुण्यसम्पादको व्यक्तिभेदः। अन्यथा द्विष्प्रयोगात्मके द्विर्वचने तथाविधस्य धातुत्वादिकमपि दुर्वचं स्यात्। किञ्च परमस्त्रजिष्ठः इत्यादौ टिलोपवारणाय पूर्वविप्रतिषेधाश्रयणे क्लेशः। वस्तुतष्टिलोपविन्मतुब्लोपयोर्यौगपद्येन प्रवृत्तौ विरोधाभावादेतादृशे विषये विप्रतिषेधशास्त्रप्रवृत्तेरनुपपत्तिरेव। न च विरोधाभावाट्टिलोपविन्मतोर्लूकोयौगपद्येन प्रवृत्तौ लक्ष्ये लक्षणस्य इत् न्यायेन्र्यौ पुनष्ठिलोपाप्रवृत्त्या निर्वाहान्नैतन्न्यायोपयोग इति वच्यम्। विन्मतोर्लुका टिभागादधिकस्यापि लुप्तया टिलोपमात्रकृतविकाराभावेन तल्लक्ष्यत्वस्य दुर्वचत्वेन पश्चात्यटिलोपप्रवृत्तिवारणस्य प्रकृतन्यायैकशरणत्वात्। एवं च भाष्यप्रमाणप्रदर्शनपुरस्सरं तत्रकौण्डिन्यायस्य अप्रवृत्तिः महता ग्रन्थेन निरूपिता।

अत्र नागेशगूढार्थदीपिकाकाराः[1]

अत्रेत्थं वार्त्तिकमतप्रपञ्चः। तक्रकौण्डिन्यायो नात्र शास्त्रे आश्रयितुं शक्यते। तक्रदानोत्तरं तस्यामेव व्यक्तौ दधिदानस्य प्रवृत्तयोग्यतायामपि विशेषविहितेन तक्रदानेन दधिदानस्य बाधो दृश्यते। शास्त्रे तु दिग्यादेशादौ प्रवृत्ते द्विर्वचने व्यक्त्यन्तरे प्रवृत्तियोग्येन विशेषविहितेनोत्सर्गबाधनमिति न्याययाननुगमत्वात्। किञ्च फलाभावेऽपि न्यायाश्रयणे। तथा हि सामान्यशास्त्रप्रवृत्त्युत्तरकालिकं चारितार्थ्यमादाय विशेषविहितस्य लब्धावकशतया प्रकृतविषये विप्रतिषेधशास्त्रेणैवोत्सर्गनिवृत्तिसिद्धौ किमनेन न्यायेन? विप्रतिषेधशास्त्रे च न केवलमेकस्य द्विकार्ययोगात्मक एव विरोधो बाधकताबीजम्। अपि तु भिन्नविषययोरपि कार्ययोर्यौगपद्येन प्रवृत्त्यसम्भवरूपोऽपीति स्पष्टमन्यत्र। अत एव शिष्टादित्यादौ परेण तातङादिना शाभावादिर्बाध्यते। अथ यत्र परत्वभावो बाधकस्य यथा परमस्त्रजिष्ठ इत्यादौ विन्मतोर्लुका टिलोपबाधने तत्र पूर्वविप्रतिषेधश्रयणेन निर्वाहः। न च अहः, अहोभ्यामित्यादौ रत्वरुत्वयोरसिद्धत्वात्प्राप्तस्य नलोपस्य बाधनमेतन्न्यायप्रयोजनमिति वाच्यम्। अहन्निति सूत्रस्यावृत्त्या नलोपाभावनिपातनेन तदुपपत्तेः। न च पयांसि यशांसीत्यादौ हलन्तलक्षणस्य नुमो मिदचोन्त्यात्परत्वेन

---

1 प.शे(नागेशगूढार्थदीपिकासहितः), पृ -३५५ -३५६

स्थाने योगत्वस्य बाधनमेतन्न्यायस्यनन्वसिद्धं प्रयोजनम्। न हि तत्र विप्रतिषेधेशास्त्रेण निर्वाहः। विरोधाभावादिति वाच्यम्। गुणानां च परार्थत्वादिति न्यायेन परस्परमनन्विताभ्यामेव ताभ्यां पृथक् प्राधानोपकारेण लक्ष्यसंस्कारे वरमव्यञ्जनविशिष्टस्यैकया साधुत्वमपरया च तद्विरहितस्योति विरोधस्य सुवचत्वात्। तस्मादत्र शास्त्रे द्वित्वनिष्पन्नस्यापि सादृश्यमूलकाभेदाध्यवसायेन तद्भक्तित्वस्य सुवचत्वात् न लोकन्यायवैगुण्यसंपादको व्यक्तिभेदः। अन्यथा द्विष्प्रयोगात्मके द्वर्वचने उत्तरखण्डस्य धातुत्वादिकमपि दुर्वचं स्यात्। किञ्च परमस्त्रजिष्ठ इत्यादौ टिलोपवारणाय पूर्वविप्रतिषेधाश्रयणे क्लेशः। किञ्च परमस्त्रजिष्ठ टिलोपविन्मुतुब्लोपयोयौगपद्येन प्रवृत्तौ विरोधाभावादेतादृशे विषये विप्रतिषेधशास्त्रप्रवृत्तेरनुपपत्तिरेव। न च विरोधाभावट्टिलोपविन्मतोर्लुकोर्यौगपद्येन प्रवृत्तौ लक्ष्ये लक्षणस्येति न्यायेन पुनष्टिलोपाप्रवृत्त्या निर्वाहान्नैतन्न्यायोपयोग इति वाच्यम्। विन्मतोर्लुका टिभागादधिकस्यापि लुप्ततया टिलोपमात्रकृतविकाराभावेन तल्लक्ष्यत्वस्य दुर्वचतया पुनः प्राप्तटिलोपस्य तेन न्यायेन वारयितुमशक्यतया तद्वरणस्य प्रकृतन्यायैकशरणत्वात्। अपि च गुणानाञ्च परार्थत्वादिति न्यायेन प्रदेशेषु परस्परमनन्वयेऽपि विध्येकवाक्यतया तल्क्ष्यतस्यकारकवाक्यर्थबोधककाले परम्परसंबन्धे बाधकाभावः। अन्यथा धातुविधाबोधकालिकस्थाने योगत्वस्येको **"गुणवृद्धी[1]"** इत्यादिभिरप्यनन्वयप्रसङ्गः। सम्पदुक्तन्ययेनैव यशांसित्यादौ मिदचोऽन्त्यात्परत्वं स्थानेयोगस्य निवर्तकम्। एवं **"द्वन्ततत्सर्गेभ्योऽपि ईत्[2]"** इत्यादिभिद्वीपमित्यादौ **"आदेः परस्य[3]"** **"अलोऽत्वस्य[4]"** इत्याभ्यामाद्यन्तयोरादेशद्वयप्रलङ्गोऽप्यनेनैव न्यायेन वारणीय प्रयवश्यश्रयणीयोऽयं न्यायः। अतिप्रसङ्गस्त्वनित्यत्वेन परिहरणीय इति। भाष्यप्रमाणप्रदर्शनपुरस्परं कौण्डिन्यायस्वाप्रवृत्तिः वाक्यर्थचन्द्रिकाकारैः, नागेशगूढार्थदीपिकाकारैश्च महता ग्रन्थेन इति निरूपयति।

---

1 अष्टा. १-१-३

2 अष्टा. ६-२-९७

3 अष्टा. १-१-५४

4 अष्टा. १-१-५२

अत्र समीक्षा

प्रामाणिकाः शास्त्रव्याख्यातारः मूलग्रन्थसमन्वयाय एव सर्वथा यतन्ते। न हि तेषां व्याख्यान्तरेषु व्याख्यान्तरकर्तृषु वा विद्वेषः। प्राचीनव्याख्यानस्य मूलग्रन्थानुसारित्वे अवश्यमेव तत्र प्रतिपादितांशानभ्युपगच्छन्ति। यदि प्राचीनानि व्याख्यानानि मूलग्रन्थाशयविरुद्धानि तर्हि तत्रनिर्वचनात् निर्मीकं निराकुर्वन्त्येव। शास्त्रसिद्धान्तशोधनं हि तेषां लक्ष्यम्। अत्र च प्रमाणत्वेन बहवः अंशाः प्रदर्शयितुं पार्यन्ते। तत्रैकमुदाहरणं प्रागुक्तम्। अत्र वाक्यार्थचन्द्रिकाकाराणाम्, नागेशगूढार्थदीपिकाकाराणां च ऐकमत्यं स्पष्टं सँल्लक्ष्यते। वार्त्तिकारामतप्रदर्शनपुरस्सरं भाष्यकारमतेन तन्निराकरणे उभयोरपि व्याख्यात्रोः मतेः नास्ति भेद इति स्पष्टमवगम्यते।

४.१०. प्रकल्प्य चापावादविषयं तत् उत्सर्गोऽभिनिविशते

लक्ष्यैकचक्षुष्कस्यापि धर्मोत्पत्तिरावश्यकी

डुधाञ् धारणपोषणयोः इति जुहोत्यादिगणपठितात् धातोः लटि प्रथमपुरुषबहुवचने 'शि' आदेशे "**कर्तरि शप्**[1]" इति शप् विकारणे "**जुहोत्यादिभ्यः श्लुः**[2]" इति श्लौ(लोपे), "**श्लौ**[3]" इति सूत्रेण धातोर्द्वित्वे अभ्यासकार्ये च इ+धा+झि इति स्थिते "**अदभ्यस्तात्**[4]" इति सूत्रेण झस्य अदादेशे इ+धा+अति इति स्थिते "**आतो लोप इटि च**[5]" इति सूत्रेण धातोः अकारस्य लोपे दध्+ अति= दधति इत्यभिष्टं रूपम्। किन्त्वत्र अदादेशं बाधित्वा अन्तरङ्गत्वात् "**झोऽन्तः**[6]" इति अन्तादेशे,अनिल्विधाविति निषेधेस्य प्रवृत्त्या, स्थानिवत्त्वाभावेन अदादेशः न स्यात्। तथा च "**अदभ्यस्तात्**[7]" इति सूत्रं व्यर्थमेव स्यादित्याक्षेपे जाते तत्सामधानत्वेन

---

1 अष्टा. ३-१-६८

2 अष्टा. २-४-७५

3 अष्टा. ६-१-१०

4 अष्टा. ७-१-४

5 अष्टा. ६-४-६४

6 अष्टा. ७-१-३

7 अष्टा. ७-१-४

परिभाषेयमारब्धा **पूर्वं ह्यपवादा भिनिविशन्ते पश्चादुत्सर्गाः**[1] इति। लक्षणैकवचक्षुष्कः अपवादशास्त्रस्य विषयविशेषं प्रर्यालोच्य उत्सर्गस्य अपवादशास्त्रविषयत्वाभावे निश्चिते अपवादविषयं तत्तल्लक्ष्यं संस्कारोति। अन्यथा विकल्पापत्तिः इति प्रकृतपरिभाषायाः आशयः।

अत्र प्रश्नः

लक्षणैकचक्षुष्कः प्रगुक्तदिशा अपवादविषयं पर्यालोच्य उत्सर्गेण तत्तल्लक्ष्यं संस्करोति इत्यत्र नास्ति कश्चित् संशयः। किन्तु पाणिन्यादिवत् योगबलेन लक्षणानधीनलक्ष्यपरिज्ञानवान् लक्ष्यैकचक्षुष्कः अत्र किं कुरुते? इति।

अत्र समाधानाम

लक्ष्यैकचक्षुष्कः तच्छास्त्रपर्यालोचनं विनापि अपवादविषयं परित्यज्य उत्सर्गेण लक्ष्यं संस्करोति। न च लक्ष्यैकचक्षुष्कस्य=लक्षणस्य सूत्रादेः का वा आवश्यकतेति वाच्यम्। **एकश्शब्दः सम्यक् ज्ञातः सुष्ठु प्रयुक्तः सवर्गे लोके कामधुक् भवति** इति श्रुतिप्रामाण्येन तस्यापि तत्तत्शास्त्रप्रक्रियास्मरणपूर्वकप्रयोगे एव धर्मः उत्पद्यते, न त्वन्याथा। एनमाशयं सर्वं मनसि निधायोक्तम् **प्रकल्प्य चापवादविषयं ततः उत्सर्गेऽभिनिविशते**[2]। अत्र, ततः= अपवादशास्त्रपर्यालोचनात् प्रागपि इत्यर्थः। एवं प्रकल्प्य इति पदस्य परित्यज्य इत्यर्थः। अत एव **"प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा**[3]" इति सूत्रे भाष्ये[4] एतत्परिभाषाद्वयं प्रस्तूय न कदाचित् तावत् उत्सर्गौ भवति, अपवादं तावत् प्रतीक्षते इत्यर्थकः आशयः प्रकटीकृतः।

अत्र वाक्यार्थचन्द्रिकाकृतः[5]

लक्ष्यैकचक्षुष्कपरतया शाश्त्रव्यवस्थापनमनुचितं, तेषां शास्त्रानुपयोगात्। न हि लक्ष्यैकचक्षुष्कानधिकृत्य शास्त्रस्य प्रवृत्तिः। शब्दतत्त्वविदां तेषां जिज्ञासानुपपत्तेः।

---

1 परिभाषेन्दुशेखरः, परि.सं.६३, पृ -३६७

2परिभाषेन्दुशेखरः, परि.सं.६४,पृ -३६९

3 अष्टा. २-३-४६

4 व्या.म.भा(द्वि.भा), पृ -५१७

5 प.शे(वाक्यार्थचन्द्रिकासहितः), पृ -३६९

शास्त्रप्रक्रियास्मरणपूर्वके साधुशब्दप्रयोगे धर्माभ्युच्चय इत्यप्ययुक्तं साधुशब्दप्रयोगे प्रयोक्तृणामभ्युदयः, साधुत्वज्ञानपूर्वके तत्प्रयोगे महानभ्युदय इत्येव पस्पशान्हिकान्तस्थभाष्यमर्यादया लाभात्। एतद्भाष्यबलात् 'एकः शब्दः' इत्यादि श्रुतौ 'शास्त्रान्वितः' इत्यस्यापि साधुत्वज्ञानविषय इत्यवार्थो न्याय्यः इत्यभिप्रयन्ति।

अत्र नागेशगूढार्तदीपिकाकाराः[1]

वाक्यार्थचन्द्रिकारोक्तमयुक्तम्। तथा हि शब्दतत्त्वविदां लक्ष्यैकचक्षुकस्या साधुपदज्ञानाय शास्त्रस्य अनावश्यकत्वेऽपि अभ्युपयसम्पादनाय तदावश्यकात्वात्। साधुशब्दप्रयोगे हि अभ्युदयः। साधुत्वज्ञानपूर्वके शब्दप्रयोगे महानभ्युदयः इति विशेषत्व पस्पशाह्निकान्तस्थभाष्यतः कथञ्चित्यप्यलाभेन तादृशविशेषकल्पनायाः अपि शास्त्रज्ञानपूर्वके शब्दप्रयोगो एव अभ्युपदयं लभते इति।

अत्र समीक्षा

तथा हि - पस्पशाह्निके भाष्ये[2] **किं साधुशब्दज्ञाने धर्मः तत्प्रयोग इति** विकल्प्याद्यपक्षे यथा साधुशब्दज्ञानाद्धर्मस्तथा अपशब्दज्ञानादधर्मोऽपि प्राप्नोतीति दूषणे द्वितीयेपक्षेऽनक्षीतशब्दशास्त्रैरपि सम्यक्साधुशब्दप्रयोगस्य कृतत्वेन शास्त्रस्य वैयर्थ्यापत्तिरिति च दुषणमभिधाय **एवं तर्हि नापि ज्ञान एव धर्मो नापि प्रयोग एव। किं तर्हि? शास्त्रपूर्वकं यश्शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यते। तत्तुल्यं वेदशब्देन** इत्युक्तम्। वेदप्रतिपाद्यानामभिष्टोमादिकर्माणां यथा ज्ञात्वाऽनुष्ठानमभ्युदयहेतुस्तथा शब्दानामपि प्रकृत्यादिज्ञानपूर्वकः प्रयोगोऽभ्युदयहेतुरिति तदर्थं कैयटः आह। उद्योतकारोऽपि[3] शास्त्रपूर्वकेत्यस्य व्याकरणाध्ययनपूर्वक इत्यर्थमभिधाय तत्र वेदाङ्गत्वादेतव्द्याकरणाध्ययनपूर्वकप्रयोग एव धर्म इति प्रामाणिका इत्याह। उपदर्शितभाष्यादिग्रन्थैस्तदुक्तार्थविशेषः कथञ्चिदप्यस्पृष्टः इति स्पष्टमेव तद्विदाम। यदि तु तत्तुल्यं वेदशब्देनेति दृष्टान्तेन यथा अधुनातनैविद्वद्भिरनुष्ठीयमानानमग्निष्टोमादिकर्मणां यत्किञ्चिदभ्युदयहेतुत्वं तथाऽज्ञानतः कृतस्य साधुशब्दप्रयोगस्यापि यत्किञ्चिदभ्युदयहेतुत्वमित्युच्यते तत्र

---

1 प.शे(नागेशगूढार्थदीपिकासहितः), पृ -३७०

2 व्या.म.भा(प्र.भा), पृ -७२

3 व्या.म.भा(प्र.भा), पृ -७४

फलाधिक्यसम्पादनायापि वा लक्ष्यैकचक्षुष्काणां शास्त्रमावश्यकमित्यवधेयम्।

४.११. उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते

भ्रष्टावसरन्यायस्यात्र शास्त्रे अनाश्रयणम् इति सिद्धान्तप्रतिपादने दीपिकाकाराणां वैदुष्यम्।

'डु धाञ् धारणपोषणयोः' इति धातोः कर्तरि लटि प्रथमपुरुषबहुवचने झि आदेशे कर्तरि शपि, "**जुहोत्यादिभ्यः श्लुः**[1]" इति सूत्रेण तस्य श्लौ(लोपे) "**श्लौ**[2]" इति सूत्रेण धातोः द्वित्वे, अभ्यासकार्ये च, दधा+झि इति दशायां "**झोऽन्तः**[3]" इति सूत्रेण प्राप्तमन्तादेशं बाधित्वा "**अदभ्यास्तात्**[4]" इति सूत्रेण झस्य स्थाने अदादेशे "**आतो लोप इटि च**[5]" इति सूत्रेण धातोः आकारस्य लोपे च दधतीत्यभीष्टं रूपं सिद्ध्यति। अत्रान्तरङ्गत्वात् अन्तादेशे अनिल्विधौ इति निषेधेन स्थानिवद्भावाभावात् अदादेशो न स्यादिति शङ्क्यं तत्समाधानत्वेन **पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः**[6] इति परिभाषा आरब्धा। लक्षणैकचक्षुष्कं मनसि निधाय इयं परिभाषा उक्ता। लक्ष्यैकचक्षुष्कस्य विषये तु **प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते**[7] इति परिभाषा पठिता। "**प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा**[8]" इति सूत्रे भाष्य[9] वाचनिकत्वेन इदं परिभाषाद्वयं पठितम्।अनयोः द्वयोः सारत्वेन भट्टोजिदीक्षितादिभिः नवीनैः वैयाकरणैः परिभाषेयं पठ्यते यथा उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते[10] इति ।

---

1 अष्टा. २-४- ७५

2 अष्टा. ६-१-१०

3 अष्टा. ७-१-३

4 अष्टा. ७-१-४

5 अष्टा. ६-४-६४

6 परिभाषेन्दुशेखरः, परि,सं -६३,पृ -३६७

7 परिभाषेन्दुशेखरः, परि.सं -६४, पृ -३६९

8 अष्टा. २-३-४६

9 व्या.म.भा(द्वि.भा), पृ -५१७

10 परिभाषेन्दुशेखरः,परि.सं.६५, पृ -३७१

येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति[1] इत्यारभ्य अपवादो अन्यत्र चरितार्थः तर्हि अन्तरङ्गेण बाध्यते इति यावत् अपवादसम्बन्धः परिभाषाः व्याख्याताः। उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते[2] इदन्तिमापरिभाषा। अस्याः व्यख्यानवसरे "**तौ सत्**[3]" इति निर्देशेन भ्रष्टावसरो न प्रवर्तते इति न्यायः व्याकरणशास्त्रे न प्रवर्तते इत्युक्तम्। अस्य न्यायस्यस्मिन् शास्त्रे न प्रवृत्तिरिति प्रतिपादानाय ध्वनितं चेदमिकोगुणेति सूत्रे भाष्ये इति भाष्यदीपोद्योते निरूपितम् इत्येवं मूलपङ्क्तिः [4]परिदृश्यते।

अत्र नागेशगूढार्थदीपिकाकाराः[5]

प्रागुक्ते वाक्ये भाष्ये पदं द्वि प्रयुक्तम्। तस्य को वा आशयः? कथं वा अत्र पङ्क्तिसमन्वयः? इत्येवं महती शङ्का जायते। इयञ्च शङ्का सरलया शैल्या गूढार्थदीपिकाकारैः परिह्रता।"**इको गुणवृद्धी**[6]" इति सूत्रे भाष्यप्रदीपोद्योते इत्यनेनान्वयः। भाष्ये इत्यस्य "**नान्तः पादमव्ययपरे**[7]" (प्रकृत्यान्तः पादमव्ययपरे६-१-११५) इति सूत्रे इत्यादिः[8] तया च "**नान्तः पादमव्ययपरे**[9]" इति सूत्रे इदं ध्वनितमितीत्यत्र सुजाते सूत्रे भाष्यप्रदीपोद्योते निरूपितमिति वाक्यार्थः।

अत्र समीक्षा

"**नान्तः पादमव्ययपरे**[10]" इत्यत्र भाष्ये[11] सुजाते अश्वसुनुत इत्यादौ पूर्वरूपनिषेधोत्तरमुत्सर्गस्य अयादेशस्य प्रसक्तिमुद्भाव्यैङो यद्यत्प्राप्त न भवतीति

---

1 परिभाषेन्दुशेखरः, परि.सं.५८,पृ -३४५

2 परिभाषेन्दुशेखरः, परि.सं.६५,पृ -३६१

3 अष्टा. ३-२-१२६

4 प.शे(नागेशगूढार्थदीपिकासहितः), पृ -३७२,३७३

5 प.शे(नागेशगूढार्थदीपिकासहितः) पृ -३७२,३७३

6 अष्टा. १-१-३

7 अष्टा. ६-१-११५

8 व्या.म.भा(पं.भा), पृ -१२५,१२६

9 अष्टा. ६-१-११५

10 अष्टा. ६-१-११५

11 व्या.म.भा(प्र.भा), पृ -१९५

बध्यसामान्याचिन्तामूलकेन व्याख्यानेन समाहितम्। प्रकृतन्यायस्यात्राश्रयणे त्वनेनैव न्यायेन सिद्धौ, किं तथाविधेन व्याख्यानेनेति तेनेदं ध्वनितमिति भावः।

४.१२. लादेशेषु वासरूपविधिर्नास्ति।

भाषायां सदवसश्रुवः(३-२-१०८) इति सूत्रविषये क्वसु – तिङोः न समावेशः इत्यंशनिरूपणम्

व्याकरणशास्त्रे उत्सर्गशास्त्रविहितं कार्यमपवादशास्त्रेण नित्यं बाध्यते। यथा "**कर्मण्यण्**[1]" इति कर्मण्युपपदे धातुसामान्यात् कर्तरि 'अण्' विहितः। उदा 'कुम्भकारः'। यस्तु धातुः आकारान्तः तत्र तु अण् प्रत्ययस्य अपवादत्वेन "**अतोऽनुपसर्गे कः**[2]" इति सूत्रेण क प्रत्ययः विहितः। उदा गोदः। एवं स्थिते क्वचित् अपवादशास्त्रेण उत्सर्गशास्त्रस्य विकल्पेन बाधकत्वमिष्टम्। एतदिष्टसिद्ध्यर्थं भगवान् पाणिनिः "**वाऽसरूपोऽस्त्रियाम**[3]" इति सूत्रमारेभे। असरूपः अपवादप्रत्ययः उत्सर्गस्य बाधको वा स्यादिति तदर्थः। अत एव "**अचो यत्**[4]" इति अजन्ताद्धातोः विहितः यत् प्रत्ययः उत्सर्गसूत्रविहितान् तव्यदादीन् प्रत्ययान् विकल्पेन बाधते। तेन चेयं, जेयम् इतिवत् चेतव्यं जेतव्यमित्यादीनि रूपाण्यपि सिद्ध्यन्तीति वैयाकरणनिष्कर्षः।

प्रगुक्तसिद्धान्तास्वीकारे "**लृट् शेषे च**[5]" इति उत्सर्गसूत्रविहितस्य लुटः विषयेऽपि तदपवादभूतस्य "**अनद्यतने लुट्**[6]" इति सूत्रविहितस्य लुटः अपि विकल्पेन बाधकत्वं स्यात्। तथा च पक्ता इत्यादौ लुड्विषये लृट् लकारोऽपि स्यादित्याक्षेपे जाते **लादेशेषु वासरूपविधिर्नास्ति**[7] इति परिभाषाया स आक्षेपः वारितः। आदेशकृतवैरूप्यवत्सु लकारेषु "**वाऽसरूपोऽस्त्रियाम्**[8]" इति सूत्रं न प्रवर्तते इति परिभाषार्थः।

---

1 अष्टा. ३-२-१

2 अष्टा. ३-२-३

3 अष्टा. ३-१-९४

4 अष्टा. ३-१-९७

5 अष्टा. ३-१-१३

6 अष्टा. ३-३-१५

7 परिभाषेन्दुशेखरः, परि.सं -७०,पृ -३८३

8 अष्टा. ३-१-९४

"**वाऽसरूपोऽस्त्रियाम्**[1]" इति सूत्रे अपवादः नाम आदेशत्वानाक्रान्तः प्रत्यय एव गृह्यते। अत एव "**भाषायां सदवसश्रुवः**[2]" इति सूत्रेण सदादिभ्यः धातुभ्यः भूतसामान्ये लिटः क्वसुः एव प्रवर्तते न तु पक्षे तिङ्। तिङ् क्वसोः आदेशत्वाक्रान्तत्वेन प्रकृतन्यायप्रवृत्त्या नित्यं क्वसुः एव प्रवर्तते, न तु क्वसु- तिङोः समावेशः इति वर्णयामास नेगेशोपाध्यायः। **अत्रेदं बोध्यम्** तथा हि "**वाऽसरूपोऽस्त्रियाम्**[3]" इति सूत्रभाष्ये[4] तत्रासरूपपदेन प्रायोगिकासारूप्यस्य ग्रहणे क्विबादीनां प्रयोगरूपामावात्तद्विषये उक्तन्यायाप्रवृत्तावणादिभिस्तेषां समावेशानापत्तिः। तथा च ग्रामणीः,गामानय इत्याद्यसिद्धिरित्याशङ्क्य तदर्थं तत्रौपदेशिकमसारूप्यं ग्राह्यमित्युक्त्वा तत्पक्षे काणोरौपदेशिकारूप्यस्य सत्त्वात्तद्विषये एतन्न्यायप्रवृत्तो कविषयेऽणोऽप्यापत्तिरिति दोषमनुद्भाव्य, सिद्धमनुबन्धस्यानेकान्तत्वादित्यादिना अनेकान्तत्वपक्षाश्रयणेन समाधाय सिद्धान्तभूते एकान्तत्त्वपक्षेऽपि "**ददातिदधात्योर्विभाषा**[5]" इति णबाधकशस्य विकल्पविधानेन **नानुबन्धकृतमसारूप्यम्**[6] इति परिभाषां ज्ञापयित्वा स दोषः परिहृतः। ततः प्रयोगेऽसरूपाणां वा विधिर्न्याय्य इत्यादिना प्रायोगिकमेवासारूप्यं ग्राह्यमित्युक्त्वा तत्पक्षे स्पक्तेत्यादौ लुङ्विषये लृडपि प्राप्नोति। तयोः प्रयोगऽसारूप्यादित्याशङ्क्य "**ह्रस्वतोर्लङ् च**[7]" इति लङ्विधानाल्लादेशेषु वासरूपविध्यभावज्ञापनेन समाहितम्। क्विपो रूपाभावादेव स प्रयोगेऽसारूपः। असरूपपदेन च समानरूपाभाववानुच्यत इति तदाशयः। तथा च तद्भाष्यद्वासरूप इत्यत्र प्रायोगिकासारूप्यस्य ग्रहणे लादेषु वासरूपविधिर्नेत्यस्य,औपदेशिकासारूप्यस्य ग्रहणे **नानुबन्धकृतमसारूप्यम्**[8] इत्यस्य चावश्यकत्वमित्यर्थोऽवगम्यते। वस्तुतस्तत्रौपदेशिकमेवासारूप्यं ग्राह्यम्।

---

1 अष्टा. ३-१-९४

2 अष्टा. ३-२-१०८

3 अष्टा. ३-१-९४

4 व्या.म.भा(तृ.भा), पृ -१३८

5 अष्टा. ३-१-१३९

6 परिभाषेन्दुशेखरः, परि.सं.८,पृ -५१

7 अष्टा. ३-२-११६

8 परिभाषेन्दुशेखरः, परि.सं.८,पृ -५१

प्रत्यासत्तिन्यायात्। अत एव भाष्ये प्रथमतः क्विबादिष्वतिप्रसङ्गवारणायौपदेशिकसारूप्यं ग्राह्यमित्युक्त्वा,तत्पक्षे काणोर्विषये प्रसक्तमतिप्रसङ्गं सिद्धमनुबन्धस्यानेकान्तत्वादित्याद्यस्थितपक्षेण परिहृत्य ततोऽथवेत्यादिना प्रयोगेऽसरूपाणां वा विधिर्न्याय्य इत्यादिना प्रायोगगिकसारूप्यं ग्राह्यमित्युक्त्वा तत्पक्षे लुडादिषु प्रसक्तमतिप्रसङ्गं लादेशेषु वाऽसरूपविध्यभावज्ञापनेन पुरिहृत्य, पुनः अथवा प्रयोगेऽसरूपाणां वाविधौ न स्र्वमिष्टं संगृहीतमिति कृत्वा द्वितीयः प्रयोग उपास्यते। कोऽसावुपदेशो नामेत्युक्त्वा, तत्पक्षे प्रसक्तः प्रागुक्तोऽतिप्रसङ्गः सिद्धान्तभूते एकान्तत्वपक्षे नानुबन्धकृतमसारूप्यमिति परिभाषाज्ञापनेन परिहृतः। एतेनात्रैव भाष्यतात्पर्यमित्यवगम्यते। अत एव "**वाऽसरूपोऽस्त्रियाम्**[1]" इति सूत्रे शेखरे[2] औपदेशिकमेवासारूप्यं तत्र ग्राह्यम्। तदप्यनुबन्धेतरवर्णकृतमेवेत्युक्तम्। तथा च तत्पक्षे लुङ्विषये लृटः प्रसक्तेरेवाभावेन नेयमावश्यकी परिभाषा। हशश्वतोर्लङ्चेति लङ्विधानं च सार्थकमिति इति।

---

1 अष्टा. ३-१-९४

2 ल.श.शे(द्वि.भा), पृ -७४८